॥ श्रीजिनाय नमः ॥

# ॥ श्रीरुपसेनचरित्रम् ॥

( कर्ता—श्रीजिनसूरिः )

-: छपावी प्रसिद्ध करनार :-

पंडित श्रावक हीरालाल हंसराज—(जामनगरवाळा)

वीर सं. २४६२ विक्रम सं. १९९२ सने १९३६

किं. रु. २-०-०

॥ श्री जिनाय नमः ॥

# ॥ अथ श्रीरूपसेनचरित्रं प्रारभ्यते ॥

(कर्ता—श्रीजिनसूरिः)

छापी प्रसिद्ध करनार—विठलजी हीरालाल हंसराज—(जामनगरवाळा)

श्रीमंतं विदुरं शांतं । लक्ष्मीराज्यजयप्रदं ॥ वीरं नत्वाद्भुतां पुण्य-कथां कांचिल्लिखाम्यहं ॥ १ ॥ आरोग्यभाग्याभ्युदयप्रभुत्व-सत्वं शरीरे च जने महत्त्वं ॥ तत्वं च चित्ते सदने च संपत् । संपद्यते पुण्यवशेन पुंसां ॥ २ ॥ यथा श्रीमन्मथनरेंद्रपुत्ररूपसेनस्य पुण्यं फलितं, तस्य कथा चेयं-भरतक्षेत्रे मगधदेशे राजगृहाख्यं नगरमस्ति, तत्र यादववंशरत्नं श्रीमन्मथाभिधो राजा राज्यं करोति. तस्य च मदनावल्यभिधाना पट्टराज्ञ्यासीत्. राजा तु न्यायेन प्रजां पालयति. अथान्यदा तत्र वर्षाकालः समायातः, तदा तत्र नगरसीम्नि शीतजलाभिधाना नदी जलपूरेण परिपूर्णा वहतिस्म. अथ तस्मिन्नवसरे राजा तत्र क्रीडार्थं

प्राप्तः, तत्र च तेनैका नौरानायिता, ततः स तां नावमुपविश्य तस्यां नद्यां क्रीडां कर्तुं प्रवृत्तः, तावता नदीमध्ये नदीपूरसंमुखमेकं पुरुषं दिव्याभरणयुतं यांतं राजा ददर्श. तं दृष्ट्वा नृपोऽपि तत्पृष्टे धावितः. ततो यथा यथा नृपस्य नौस्तत्पृष्टे समायाति तथा तथा स पुरुषः शीघ्रमग्रतो याति, तस्य पुरुषस्य च जलोपरि केवलं मस्तकमेव राजा विलोकयति. अथ राजा मनसि विस्मितः सन् विचारयामास यन्नूनमयं कोऽपि दिव्यानुभावः संभाव्यते. अथ कियद्दूरं गत्वा तन्मस्तकं जलोपरि स्थिरं जातं, तदा राज्ञा द्रुतमेव तत्पश्चाद्गत्वा तन्मस्तकं वेणिदंडे धृतं. यावच्च स तदुच्चैराकर्षति तावत्केवलं मस्तकमेव तद्धस्ते समागतं. ततो राजा खिन्नः सन् यावत्पुनर्नदीमध्ये विलोकयति तावत्तथैव समस्तकं तमेव पुरुषं नदीप्रवाहमध्ये यांतं पश्यति. तदा विस्मितेन राज्ञा चिंतितं नूनमियं कापि दैवी शक्तिरस्ति. अथ राज्ञा तन्मस्तकंप्रति पृष्टं त्वं कोऽसि? तेनोक्तमहं देवोऽस्मीत्युक्त्वा तेन पुनर्नृपः पृष्टस्त्वं कोऽसि? नृपेणोक्तमहं राजास्मि, तदा शीर्षं प्राह, यदि त्वं राजासि तर्हि विनाऽन्यायं चोरवद्वेणिदंडे त्वयाहं कस्माद्धृतः? राजा तु सर्वेषां शरणं स्यात्, उक्तं च—दुर्बलानामनाथानां । बालवृद्धतपस्विनां ॥ परैस्तु परिभूतानां । सर्वेषां पार्थिवो गतिः ॥ ४ ॥ पंचमो लोकपालोऽसि । कृपालुः पृथिवीपते ॥ पराभवसि चेत्त्वं मा—मन्यायः कस्य कथ्यते ॥५॥

तेन त्वं मां मुंच? इति तेनोक्ते राज्ञा मस्तकं मुक्तं. इतः स देवो जलमध्ये हस्तिरूपो जातः, तदा स कौतुकी राजापि नावं त्यक्त्वा तस्य गजस्योपरि चटितः, तत्क्षणं स गजोऽप्याकाशे समुत्पतितः. एवं स राजा गजोपविष्टो गगनमार्गे गच्छन् यावत्पृथ्वीगतनानाकौतुकानि पश्यति, तावत्स गज एकस्मिन् वनमध्ये गत्वाकाशात्समुत्तीर्य शुंडादंडेन तं राजानं भूमेरुपरि मुक्तवान्. ततः स हस्ती त्वदृश्यो जातः. अथ किमिदं जातमिति यावत्स राजा चिंतयति तावता तेन तत्र वनमध्ये श्रीधर्माचार्या गुरवो दृष्टाः. तान् दृष्ट्वा राजा हृष्टः सन् तेषां वंदनार्थं तत्र प्राप्तः, गुरुभिरपि तस्य धर्मोपदेशो दत्तः, यथा हे राजन् त्वं विषादं मा कुरु? धर्मविषये प्रमादं च मुंच? यतः—मानुष्यमार्यदेशश्च । जातिः सर्वाक्षपाटवं ॥ आयुश्च प्राप्यते तत्र । कथंचित्कर्मलाघवात् ॥ ६ ॥ प्राप्तेषु पुण्यतस्तत्र । कथकश्रवणेष्वपि ॥ तत्वनिश्चयरूपं तु । बोधिरत्नं सुदुर्लभं ॥ ७ ॥

एक्कोवि य पयारो । धम्मस्स निसेविओ सुरतरुव्व ॥ तेणंवि य सो पावइ । मणवंछियसिवसुखाइं ॥ ८ ॥ संपदो जलतरंगविलोला । यौवनं त्रिचतुराणि दिनानि ॥ शारदाभ्रमिव चंचलमायुः । किं धनैः कुरुत धर्ममनिंद्यं ॥ ९ ॥ इत्यादि गुरुदत्तं धर्मोपदेशं श्रुत्वा राज्ञः प्रतिबोधो जातः, तेन च स तत्र जिन-

धर्मं प्रतिपन्नवान्. ततो राजा गुरुप्रति पृच्छति, हे भगवन् कः स देवः को हस्ती च? यो मामत्र मुक्त्वा गतः, एवं यावत्स पृच्छति तावत्स देवोऽपि तत्रागतः. अथ गुरुभिरुक्तं हे राजन् एष तव बांधवोऽस्ति, पूर्वं श्राद्धधर्ममाराध्य स देवोऽभूत्, तत्र चावधिना त्वां स्वबांधवं राज्यलोलुपं ज्ञात्वा त्वत्प्रतिबोधाय तेन हस्तिरूपं कृत्वा त्वमस्मत्पार्श्वे समानीतोऽसि. तत् श्रुत्वा प्रमुदितो राजा तं देवंप्रति जगौ, हे बांधव अद्यतनं दिनं सफलं जातं यन्मया त्वं दृष्टः, धर्मश्च लब्धः, तदा देवेन तंप्रत्युक्तं, रे बांधव! अतः परं त्वमेकमना जिनधर्ममाराधय? येन तव सर्वं भव्यं भविष्यति. तदा राज्ञोक्तं हे देव पुत्रं विना धर्मे ममैकचित्तता न भवति, यतो मे पुत्रा जाता अपि कर्मयोगतो मृताः, तत्संबंधि मे मानसेऽतीवदुःखं वर्तते, यतः—बालस्स मायमरणं। भज्जामरणं च जुव्वणारंभे ॥ बुद्धस्स पुत्तमरणं। तिन्निवि गुरुआइं दुक्खाइं ॥ १० ॥ पुत्रं विना हि धनराज्यादि सर्वमपि वृथा. यतः—विना स्तभं यथा गेहं। यथा देहो विनात्मना ॥ तरुर्विना यथा मूलं। विना पुत्रं कुलं तथा ॥ ११ ॥ अपुत्रस्य गृहं शून्यं। दिशः शून्या अबांधवाः ॥ मूर्खस्य हृदयं शून्यं। सर्वशून्या दरिद्रता ॥ १२ ॥ जिहां बालक तिहां पोंखणुं। ज्यां गोरस त्यां भोग। मीठाबोला ठक्कुरा। गामे वसे बहु लोक ॥ १३ ॥ तत् श्रुत्वा देवेनोक्तं हे राजन्! अथ

धर्वप्रभावात्तव चिरायुषः पुत्रा भविष्यंति, नात्र संशयः, यतः–पियमहिलामुहकमलं । बालमुहं धूलि धूसरच्छायं ॥ सामिमुहं सुपसन्नं । तिन्निवि पुन्नेहिं पावंति ॥ १४ ॥ तत् श्रुत्वा हृष्टो राजा गुरून् वंदित्वा तस्यैव देवस्य सान्निध्येन स्वनगरवने प्राप्तः. अथ धर्मप्रतिपत्तिसंतुष्टेन तेन देवेन तस्मै राज्ञे सर्वरोगहरं सुवर्णकच्चोलकमेकं दत्तं, कथितं चात्र निहितेन पीतेन जलेन सर्वे रोगा यास्यंतीत्युक्त्वा स देवः स्वस्थाने प्राप्तः.

अथ राजानं पुनः कुशलेन स्वनगरे समागतं विलोक्य सर्वेऽपि लोका हर्षिताः, राज्ञापि लोकानामग्रे तद्देवस्वरूपं स्वयं स्वीकृतधर्मप्रतिपत्तिस्वरूपं च प्रोक्तं, तत् श्रुत्वा ते सर्वेऽपि लोका जैनधर्मे स्थिरा जाताः, यतः—राज्ञि धर्मिणि धर्मिष्टाः । पापे पापाः समे समाः ॥ राजानमनुवर्तंते । यथा राजा तथा प्रजाः ॥ १५ ॥ पट्टराज्ञ्यपि जैनधर्मं प्रत्यपद्यत, यतः—पतिकार्यरता नित्यं । भर्तुश्चित्तानुवर्तिनी ॥ यस्येदृशी भवेद्भार्या । स्वर्गस्तस्येह विद्यते ॥ १६ ॥ स्वजने या च सस्नेहा । देवे गुरौ च सादरा ॥ अतिथावागते हृष्टा । सा कुलस्त्री श्रुता जने ॥ १७ ॥ अथ श्रीदेवपूजापंचपरमेष्टिध्यानसुपात्रदानादिपुण्यकार्याणि कुर्वतोस्तयोः क्रमेण पुत्रयुग्मं जातं. तदा तत्सुवर्णकच्चोलकनीरं तयोः पाययित्वा राज्ञा महोत्सवः कृतः,

दानानि दत्तानि, ततः कुटुंबिनां भोजनवस्त्रादि मानपूर्वं दत्वा राज्ञा तयो रूपसेनो रूपराजश्चेति नामनी दत्ते. क्रमेण वर्धमानौ तौ सर्वेषामपि वल्लभौ जातौ, यतः—स एव रम्यः पुत्रो यः । कुलमेव न केवलं ॥ पितुः कीर्तिं च धर्मं च । गुणांश्चापि विवर्धयेत् ॥ १८ ॥ सौरभ्याय भवंत्येके । चंदना इव नंदनाः ॥ मूलोत्थित्यै कुलस्यान्ये । वालका इव बालकाः ॥ १९ ॥ क्रमेण राज्ञा तौ पंडितपार्श्वे चाध्यापितौ, यतः–प्रथमे नार्जिता विद्या । द्वितीये नार्जितं धनं ॥ तृतीये नार्जितो धर्म–श्चतुर्थे किं करिष्यति ॥ २० ॥ किं कुलेन विशालेन । विद्याहीनस्य देहिनः ॥ विद्यावान् पूज्यते लोके । निर्विद्यः परिभूयते ॥ २१ ॥ एवं तौ द्वावपि पुत्रौ क्रमेण शास्त्रकलापारीणौ जातौ, तथापि तौ विद्याभ्यासं न मुंचतःस्म. यतः–संतोषस्त्रिषु कर्तव्यः । स्वदारे भोजने धने ॥ त्रिषु चैव न कर्तव्यो । दाने चाध्ययने तपे ॥ २२ ॥ क्रमेण यौवनं प्राप्तौ तौ विनयविवेकचातुर्यादिगुणैः सर्वत्र प्रसिद्धौ जातौ, यतः—गुणेषु यत्नः क्रियतां । किमाटोपैः प्रयोजनं ॥ विक्रीयंते न घंटाभि–र्गावः क्षीरविवर्जिताः ॥ २३ ॥ अथ राजा तयोः पाणिग्रहणार्थं सर्वत्र कुलगुणादिभिस्तदनुरूपाः कन्या विलोकयामास. इतो मालवदेशे धारानगर्यां प्रतापसिंहाख्यो राजा राज्यं कुरुतेस्म. तस्य बहवः पुत्राः संति, तेषामुपरि चैका पुत्री वर्तते, सा कन्या च सर्वशास्त्रकलादिषु

कुशलास्ति, क्रमेण तां यौवनवतीं दृष्ट्वा राजा तस्या अनुरूपवरार्थं गवेषणां करोतिस्म. यतः—विभूति-र्विनयश्चापि। विद्या वित्तं वपुर्वयः ॥ विज्ञानं यस्य सन्त्येते। सवा योग्यो वरः स हि ॥२४॥ तथा च—सुकुले योजयेत्कन्यां ॥ विद्यां पात्रे नियोजयेत् ॥ व्यसने योजयेत् शत्रु-मिष्टं धर्मे नियोजयेत् ॥ २५ ॥

अथैकदा तदर्थं राज्ञा पृष्टेन मंत्रिणोक्तं, हे स्वामिन् मन्मथराजांगजौ गजाविव स्कंधोध्धुरौ बालावपि बहुगुणौ श्रूयमाणौ स्तः. यतः—गुणैरुत्तमतां याति। बालो न वयसा पुनः ॥ द्वितीयायां शशी वंद्यः। पूर्णिमायां तथा न हि ॥ २६ ॥ तेनेयं रूपादिगुणशालिनी कन्या यदि स्वयंवरा तत्र प्रेष्यते तदा वरं. तत् श्रुत्वा नृपेणोक्तं हे मंत्रिन् त्वया युक्तमेवोक्तं. ततो राज्ञा विवाहस्य सकलसामग्रीं विधाय शमसाहसरूपकृपादाक्षिण्यगांभीर्यादिगुणोपेतस्य रूपसेनकुमारस्य पाणिग्रहणार्थं मंत्रीश्वरादिपरिवारेण सह सा स्वयंवरा कन्या तत्र प्रेषिता. क्रमेण सापि परिवारयुता राजगृहपरिसरवने प्राप्ता. ततो नगरमध्ये इति वार्ता प्रसिद्धाभूत्, यद्रूपसेनकुमारस्य स्वयंवरा कन्या समागतास्ति. अथ प्रातस्तेनागतेन मंत्रिणा मंथरनृपसभायां समागत्य राज्ञः प्राभृतं कृत्वा कन्याप्रेषणस्वरूपं कथितं. तदा हृष्टेन राज्ञापि बहुमानपुरस्सरं तेषामावासोत्तारकादि कारितं. अथ राज्ञा शुद्धलग्नग्रहणार्थं सर्वेऽपि ज्योतिःशास्त्रविदः समाकारिताः,

तेऽपि सभायां प्राप्ताः, न्यायो धर्मो दर्शनानि । तीर्थानि सुखसंपदः ॥ यस्याधारात्प्रवर्तंते । स जीयात्पृथिवीपतिः ॥ १ ॥ इत्याशीर्वादं दत्वा ते यथास्थानमुपविष्टाः. ततो राज्ञादिष्टास्ते वरकन्ययोर्मेलापकार्थं लग्नं विलोकयंतः संतः परस्परं विचारयामासुः, ततस्तैर्यथास्थितं विचार्यैकांते राज्ञो ज्ञापितं, हे राजेंद्र यदि रूपसेनकुमारस्यैतया कन्यया सह विवाहः करिष्यते तदा चतुरिकामध्ये चतुर्थे फेरके कुमारस्य मरणं भविष्यति, नात्र संदेहः. तत् श्रुत्वा राजा कृष्णमुखो बभूव, हर्षस्थाने च तस्य विषादो जातः. ततो राज्ञा मंत्रिणः पृष्टाः, भो मंत्रिणः! अथ किं कर्तव्यं? स्वयंवरेयं कन्या धारानगर्या राज्ञा रूपसेनं योग्यं विज्ञायात्र प्रेषितास्ति, यदि च सा पश्चात्प्रेष्यते तदावयोर्द्वयोरपि महत्त्वं कथं तिष्टेत्? अतोऽत्रार्थे कापि बुद्धिः कर्तव्या, यतः—यस्य बुद्धिर्बलं तस्य । निर्बुद्धेस्तु कुतो बलं ॥ वने सिंहो मदोन्मत्तः । शशकेन निपातितः ॥ २८ ॥

तदा मंत्रिणा स्वबुध्ध्या विचार्य प्रोक्तं, चेदनया कन्यया सह रूपराजकुमारस्य मेलापकः स्यात्तदा तयोरेव विवाहः कार्यः. तत् श्रुत्वा राज्ञा रूपराजकुमारस्य विषये पृष्टास्ते दैवज्ञा लग्नशुद्धिग्रहशुद्धिदिनशुध्ध्यादि ज्ञात्वा नृपस्य कथयामासुः, हे राजेंद्र तया कन्यया सह रूपराजकुमारस्य समीचीनो मेलाप-

कोऽस्ति. ततस्तत्स्वरूपं राज्ञा धारानृपमंत्रिभ्यो ज्ञापितं, तैरपि च विचार्य रूपराजस्य कन्यादानं स्वीकृतं. ततो यद्भाव्यं तद्भवत्येव. यतः—जइ चलइ मंदरगिरि । अहवा चलंति सायरा सव्वे ॥ ध्रुवचक्कं न य चलइ । न चलइ पुव्वकयं कम्मं ॥ २९ ॥ ततो राज्ञा महोत्सवपूर्वकं तया कन्यया सह रूपराजकुमारस्य विवाहः कृतः, धारानगरमंत्र्यादिपरिवारश्च वस्त्राभूषणादिभिः सत्कृत्य विसर्जितः. अथ तत्र राजगृहे पौराः परस्परमिति कथयितुं लग्ना यन्नृपस्य रूपराजकुमार एव वल्लभोऽस्ति, तेन स एव गुणवानपि संभवति. किंच पित्रोस्तु सर्वेऽपि पुत्राः समानाः स्युः, परं रूपसेनकुमारे कोऽप्यवगुणः संभवति, येन स न परिणायितः, यतः—एक आंबा ने आकडा । बिहुं सरिखां फल होय ॥ पण आकड अवगुणभर्यो । हाथ न झाले कोय ॥ ३० ॥ इत्यादि लोकवचनानि श्रुत्वा रूपसेनकुमारो विषण्णः सन् स्वमित्राग्रे कथयामास, हे मित्र पित्रा त्वहं मम हितकरणाय तया कन्यया सह न परिणायितः, परं लोकास्त्वसमंजसं वदंति, तेन मे मानसं दुनोति, तेनाहं लोकानां शिक्षां दातुमिच्छामि. तदा मित्रेणोक्तं हे मित्र! लोकैः सह कलिकरणं ते युक्तं न, यतः—जइ मंडलेण भसिअं । हत्थिं दट्ठूण रायमग्गंमि ॥ ता किं गयस्स जुत्तं । सुणहेण समं कलिं काओ ॥ ३२ ॥ लोकानां मुखानि केनापि बध्धुं न शक्यंते. नीचा हि स्वकुलानुसारेण

परदोषान् वदंत्येव, यतः—यदि काको गजेंद्रस्य । विष्टां कुर्वीत मूर्धनि । कुलानुरूपं तत्तस्य । यो गजो गज एव सः ॥ ३३ ॥ जगति ये दुर्जनाः संति तेषां परदोषग्रहणेनैव हर्षः, यतः–बज्झइ वारि समुद्दह । बज्झइ पंजर सींह ॥ पण बांधी केणे कही । दुज्जणकेरी जीभ ॥ ३४ ॥

परापवादनिरतो । मातुरप्यधिकः खलः ॥ माता मलं हि हस्तेन । खलः क्षालति जिह्वया ॥३५॥ तं नत्थि घरं तं नत्थि । देउलं राउलंपि तं नत्थि ॥ जत्थ अकारण कुविया । दो तिन्नि खला न दीसंति ॥ ३६ ॥ अतो हे कुमार! लोकानां वचनैस्त्वया मनसि किमपि नानेयं. इत्युक्त्वा स सुहृत्स्वगृहे गतः. अथ तेन रूपसेनकुमारेण चिंतितं लोका अत्र मां हसंति, केवलं मम दोषमेव जल्पंति, तन्मेऽत्र स्थातुं युक्त न. मानं हि महतां धनमिति हेतोरहमत्र सर्वथा न स्थास्यामि, अथाहं विविधदेशान् विलोक्य स्वभाग्यपुण्यपरीक्षां करिष्यामि, पुण्यप्रसादात् परदेशेऽपि मम सुखमेव भविष्यति, यतः–सर्वत्र वायसाः कृष्णाः । सर्वत्र हरिताः शुकाः ॥ सर्वत्र सुखिनां शर्म । दुःखं सर्वत्र दुःखिनां ॥ ३८ ॥ तेन परदेशगमनेनैवोत्तमानां महत्त्वं स्यात्, यतः—हंसा महीमंडलमंडनाय । यत्रापि तत्रापि गता भवंति ॥ हानिस्तु तेषां हि सरोवराणां । येषां मरालैः सह विप्रयोगः ॥ ३९ ॥ इति विचिंत्य स रात्रौ गच्छन्

॥ १० ॥

प्रतोल्यां द्वारपालेन पृष्टः, भो कुमार अद्य रात्रौ त्वं क्व गच्छसि? गमनकारणं च कथय? नृपादेशं विना त्वां गंतुं न दास्यामि. यतः—

आज्ञाभंगो नरेंद्राणां। वृत्तिच्छेदो द्विजन्मनां॥ पृथक् शय्या च नारीणा—मशस्त्रो वध उच्यते ॥४०॥

तत् श्रुत्वा कुमारेणैकः स्वर्णदीनारस्तस्मै दत्तः, तदा हृष्टेन द्वारपालेन स किमप्यनापृच्छ्य प्रतोल्या बहिष्कृतः. द्रव्येण सर्वः कोऽपि वशीभवति. अथ कुमारोऽपि पवनवेगाश्वारूढोऽग्रे चलितो बहुदूरं वनं प्राप्तः, तत्र च तेनैको जिनप्रासादो दृष्टः, तं च स त्रिःप्रदक्षिणीकृत्यांतः प्रविष्टः, तत्र च तेन सर्वविघ्नहरी सर्वसौख्यकरी च श्रीपार्श्वप्रभोर्मूर्तिर्दृष्टा. मुदितः सन् स तां प्रणम्य चैत्यवंदनं कर्तुं लग्नः—सुप्रभातः सुदिवसः। कल्याणं मेऽद्य मंगलं॥ यद्वीतराग दृष्टोऽसि। त्वं त्रैलोक्यदिवाकर ॥ ४१ ॥ ॐ नमः पार्श्वनाथाय। विश्वचिंतामणे प्रभो। ॐ धरणेंद्रवैरोट्या—पद्मादेवीयुताय ते ॥ ४२ ॥ एवं श्रीगुर्वाम्नायपूर्वकं मंत्रबीजयुतं श्रीपार्श्वनाथस्तवं कृत्वा रूपसेनस्ततः पुनरग्रे प्रस्थितः. एवं तेन षोडशप्रहरान् यावत्तुरंगारूढेन गमनं कृतं, ततोऽसौ तुरंगमं श्रांतं विज्ञाय वने मुक्त्वा स्वयं च क्षणमेकं तुंगगिरिसमीपे सहकारवने विश्रांतः. इतो मन्मथराज्ञा रूपसेनकुमारं नगरमध्येऽनालोक्य तस्य शुद्धये सर्वत्र परितः स्वसे

वका मुक्ताः, तैरपि गहनवनादिषु विलोकितं, बहवः पथिकाः पृष्टाः, परं तस्य क्वापि शुद्धिर्न लब्धा, ततस्ते पश्चान्निवृत्य भूपं कथयामासुः, हे स्वामिन् कुमारस्य शुद्धिस्त्वस्माभिः कुत्रापि न प्राप्ता. तदा विषादपरेण राज्ञा निमित्तज्ञा आहूताः, अथ सदसि समागतास्ते राज्ञा पृष्टाः, भो निमित्तज्ञा रूपसेनकुमारः क्व गतोऽस्ति? कदा च स मिलिष्यतीत्यादि सम्यग् निमित्तं विलोक्य यूयं कथयत? इति नृपेणोक्ते ते स्वस्वबुद्ध्यनुसारेण विमर्शं कृत्वा किमपि न कथयंति. तदा राज्ञा पुनः पृष्टास्ते कथयामासुः, हे स्वामिन् तत्सर्वं वयं प्रातः कथयिष्यामः. ततो राज्ञा विसर्जितास्ते प्रभाते पुनरागत्य राजानं कथयामासुः, हे राजन् रूपसेनकुमारसंबंधिवृत्तांतं वयं कथयितुं नेच्छामः, तेन भवद्भिर्न पृष्टव्यं, कथिते च भवतो महद्दुःखं भविष्यति, तत् श्रुत्वा राजा मूर्छितः, क्षणाच्च पुनः सावधानोऽभूत्. ततो राजा जैनाचार्यमाकार्य तद्विषये पृष्टवान्, तैश्च पद्मावतीदेवीसान्निध्याद्विलोक्य राज्ञोऽग्रे निवेदितं, हे राजन् तद्विषये मया पृष्टया पद्मावतीदेव्येत्याख्यातमस्ति, यथा—मन्मथराज्ञः पुत्रः । परदेशगतोऽत्र रूपसेनाख्यः ॥ द्वादशवर्षैरेव हि । मिलिष्यति श्रीकलत्रयुतः ॥ ४५ ॥ एतद्विषये च संदेहो नास्ति, यतो देवभाषितमन्यथा न भवति. तत् श्रुत्वा राज्ञो भृशं दुःखं संजातं. परिवारोऽपि सर्वः सशोकोऽभूत्. राजा सभायामपि नोप-

विशति, यतस्तेन गुणिना पुत्रेण विना सभा न शोभते, यतः—एकेन वनवृक्षेण । पुष्पितेन सुगंधिना ॥ वासितं तद्वनं सर्वं । सुपुत्रेण कुलं यथा ॥ ४६ ॥ एकेन राजहंसेन । या शोभा सरसो भवेत् ॥ न सा बकसहस्रेण । सुपुत्रेण तथा कुलं ॥ ४७ ॥ अहो तेनैव सुपुत्रेण मम कुलस्य ख्यातिर्जाताभूत्. अथ राजा पुनः पुत्रस्य कुशलागमनाय देवानां पूजोपहारधूपभोगादि मनुते, यतः—आर्ता देवान्नमस्यंति । तपः कुर्वंति रोगिणः ॥ निर्धना विनयं यांति । वृद्धाः स्युः शीलशालिनः ॥ ४८ ॥ पुनः स नृपः सर्वदा तद्विषये शास्त्रज्ञान् वैदेशिकांश्च पृच्छति, एवं स राजा रूपसेनकुमारं मनसा मनागपि न विस्मरति. यतः—गुणिणो गुणेहिं दोसेहिं । दुज्जणा सिणेहेण सज्जणा चेव ॥ देसंतरगयावि हु । तिन्निवि हियए खडक्कंति ॥ ४९ ॥ अथ कियत्समयानंतरं मंत्रिप्रभृतीनामाग्रहेण राजा शोकं निवार्य सभायामुपविशन् राज्यकार्याणि करोतिस्म. इतो रूपसेनः क्षणं तत्र वने विश्रम्य वनफलानि भक्षयन्नग्रे चलितः, तावता मार्गे तस्यैकः स्थविरो ब्राह्मणो मिलितः. स वृद्धो द्विजः करगृहीतयष्टिरत्यंतं गतदृष्टितेजा अपि लोभेन भिक्षाद्यर्थं ग्रामंग्रामंप्रति भ्रमति. यतः—

अंगं गलितं पलितं मुंडं । जातं दशनविहीनं तुंडं ॥ वृद्धो याति गृहीत्वा दंडं । तदपि न मुंच-

त्वाशापिंडं ॥ ५१ ॥ अथ तं द्विजं दृष्ट्वा कुमारेण तस्मै नमस्कारः कृतः, द्विजेनापि स्वस्ति भवत्विति कथयित्वा तस्य सन्मुखं विलोकितं उपलक्षितश्च तेन यदयं मन्मथनृपपुत्रो रूपसेनोऽस्तीति. यतो दक्षिणाग्रहणार्थं बहुवारं मन्मथनृपसभागतेन तेन स रूपसेनकुमारः सभायां दृष्टोऽभूत्. अथ कुमारेण द्विजंप्रति प्रोक्तं भो भूदेव अस्मिन् गहने वने कुतस्त्वदागमनमभूत्? द्विजेनोक्तं भो कुमार चतुर्थकषायोदयेन, यतो मन्मथराज्ञः पुत्रस्य मया विवाहो जायमानः श्रुतोऽस्ति, तेन तत्र दक्षिणार्थं गच्छामि. यतः—मोदका यत्र लभ्यंते । न दूरे पंचयोजनी ॥ वटका यत्र लभ्यंते । न दूरे दशयोजनी ॥ ५२ ॥ तत् श्रुत्वा कुमारेणोक्तं सत्यमेतत्, तर्हि त्वं तत्र शीघ्रं गच्छ? द्विजेन पृष्टं, भो कुमार अस्मिन्नवसरे गृहं विमुच्य त्वं क्व गच्छसि? कुमारः प्राह परदेशदिदृक्षया. द्विजेनोक्तमत्र केनापि कारणेन भाव्यं, कुमारः प्राह कारणं तु कर्मैव. यतः—किं करोति न हि प्राज्ञः । प्रेर्यमाणश्च कर्मभिः ॥ प्रोक्तैव हि मनुष्याणां । बुद्धिः कर्मानुसारिणी ॥ ५४ ॥ तत् श्रुत्वा द्विजेनोक्तं नूनं त्वं गृहात्क्रुद्धः सन् गच्छसि, अतस्त्वं पश्चाद्वलस्व? प्राज्ञैर्जनैः क्रोधो न कार्यः, यतः—सर्वोपतापकृत्क्रोधः । क्रोधो वैरस्य कारणं ॥ दुर्गतिदायकः क्रोधः । क्रोधः शमसुखार्गला ॥ ५५ ॥ इति द्विजेनोक्तेऽपि यदा कुमारः पश्चाद्वलितुं नैच्छत्तदा तेन

पुनरुक्तं, हे कुमार विदेशा विषमाः संति, त्वं च सरलः सुकुमारोऽसि. कुमारः प्राह धीराणां किं विषमं? यतः—कोऽतिभारः समर्थानां। किं दूरं व्यवसायिनां॥ को विदेशः सविद्यानां। कः परः प्रियवादिनां॥ ५७॥ तेन भो द्विज त्वं कनकपुरनगरस्य प्राध्वरं मार्गं मे दर्शय? यदहं तत्र गंतुमिच्छामि. द्विजः प्राह भो कुमार स मार्गस्त्वत्यंतं विषमोऽस्ति, तत्र च भूरि भयं वर्तते, तेन त्वं तत्र मा गच्छ? कुमारेणोक्तं तस्मिन् मार्गे कस्य भयं वर्तते तन्मे कथय? तेनोक्तं तर्हि श्रृणु? इतो दूरे मार्गे एवैको महान् वटोऽस्ति, स वटवृक्षश्च शाखाप्रशाखापत्रपुष्पादिभिरलंकृतोऽस्ति, किंच तस्यैकैका शाखा योजनप्रमाणास्ति. चतुर्दिक्षु तासु चतसृषु शाखासु च विद्यासिद्धाश्चत्वारो योगिनो वसंति.

तेषां चतुर्णां योगिनां दृष्टौ त्वया न गंतव्यं, यतस्ते मनुष्याणामुपद्रवकारिणः संति. तेन च त्वयान्यमार्गेणान्यस्मिन्नेव नगरे गंतव्यं. तत् श्रुत्वा कुमारः प्राह, भो द्विज तस्मिन् मार्गे गमने मम चेतसि किंचिदपि भयं नास्ति, यतो मे तु पुण्यमेव शरणमस्ति. उक्तं च—वने रणे शत्रुजलाग्निमध्ये। महार्णवे पर्वतमस्तके वा॥ सुप्तं प्रमत्तं विषमस्थितं वा। रक्षंति पुण्यानि पुराकृतानि॥ ५८॥ जिनैर्निरूपिते धर्मे। न चलत्यत्र यन्मनः॥ शूरास्त एव तेषां च। रक्षां कुर्वंति देवताः॥ ५९॥ द्विजेनोक्तं तर्हि

त्वं मार्गे सावधानो भूयाः? इत्युक्त्वा तेनाशीर्वादो दत्तः, यथा—तव वर्त्मनि वर्ततां शिवं । पुनरस्तु त्वरितं समागमः ॥ अथ साधय साधयेप्सितं । स्मरणीयाः समये वयं वयं ॥ ६० ॥ अथ कुमारो ब्राह्मणंप्रति जगौ, भो द्विज त्वया राजगृहे कस्याप्यग्रे मम स्वरूपं न कथनीयं, इत्युक्त्वा तं दक्षिणां दत्वा विसृष्टवान्. अथ रूपसेनकुमारो मनसि चिंतयति नूनं सत्त्वमेव मनुष्याणां श्रेयस्करं, यतः—सत्त्वाद्वर्षंति पर्जन्याः । सत्वात्सिद्ध्यंति देवताः ॥ सत्वेन धार्यते पृथ्वी । सर्वं सत्वे प्रतिष्टितं ॥ ६१ ॥ इति विचार्य स पंचपरमेष्ठिनमस्कारमेव हृदि ध्यायन्नग्रे चलितः. यतः—नमस्कारसमो मंत्रः । शत्रुंजयसमो गिरिः ॥ वीतरागसमो देवो । न भूतो न भविष्यति ॥ ६२ ॥ इति ध्यायतस्तस्याग्रे गच्छतः शुभाः शकुना जाताः. यतः—कालुं हरण होलाहीउं । वायस कुक्कर मोर ॥ ए लीजें डाबां भलां । जेथी नावे चोर ॥ ॥ ६३ ॥ जंबूचासवरक्खे । भारंडाए तहेव नूले अ ॥ दंसणमेव पसत्थं । पयाहिणे सव्व संपत्ती ॥ ६४ ॥ अथ तस्य रूपसेनकुमारस्य गच्छतो नकुलः प्रदक्षिणो जातः, एवं गच्छन् स क्रमेण वनपर्वतमालाश्चोल्लंघयामास. अथ मध्याह्नसमये तस्यातीवतृड् लग्ना. तेन स चिंतयामास, अहो विदेशे महाकष्टानि, वनं रौद्रं भयं तीव्रं । तृषा मां बाधतेऽधिकं ॥ पादाभ्यां गमनं कष्टं । गंतव्यं शतयोजनीं ॥ ६५ ॥ अग्रे गच्छन्

श्रांतः सन् स एकस्य निंबवृक्षस्य छायायामुपविष्टः, तत्र च स गतश्रमः शीतलांगो जातः, तदा तेन चिंतितं अहो विधात्रायमपि वृक्षो रोगनिवारणो निर्मितोऽस्ति. यतः—निंबो वातहरः कलौ सुरतरुः शाखाप्रशाखाकुलः। पित्तघ्नः कफमारुतव्रणहरो द्राक्पाचकः शोधकः॥ कुष्टच्छर्दिविषापहः कृमिहरस्तापस्य निर्नाशको। बालानां हितकारको विजयते निंबाय तस्मै नमः॥ ६६॥ सामान्यवृक्षा अपि मार्गस्थाः पथिकानामुपकारिणो भवंति, यतः—वरं करीरो मरुमार्गवर्ती। समग्रलोकं कुरुते कृतार्थं॥ किं कल्पवृक्षैः कनकाचलस्थैः। परोपकारप्रतिलंभदुःस्थैः॥ ६७॥ क्षणं तत्र स्थित्वा यावत्सोऽग्रे गच्छति तावन्निर्मलशीतलजलपूर्णा नद्येका समागता, हृष्टेन तेन नदीतो वस्त्रपूतं जलं पीतं. यतः—

सत्यपूतं वदेद्वाक्यं। मनःपूतं समाचरेत्॥ दृष्टिपूतं न्यसेत्पादं। वस्त्रपूतं पिबेज्जलं॥ ६८॥ पृथिव्यां त्रीणि रत्नानि। जलमन्नं सुभाषितं॥ मूढैः पाषाणखंडेषु। रत्नसंज्ञाभिधीयते॥ ६९॥ अथ स ततः शीघ्रं कनकपुरंप्रति गच्छन् दूरस्थमुच्चैस्तरं तं वटवृक्षं ददर्श. ततः सावधानतया यावत्तस्य वृक्षस्य समीपे स याति तावत्तैश्चतुर्भिर्योगीन्द्रैः स मार्गे आगच्छन् दृष्टः. तदा ते संमील्य परस्परं कथयामासुरहोऽयं समागच्छन्नरः कोऽपि महापुरुषो ज्ञायते, इति विचार्य ते तस्य सन्मुखं चेलुः. ततो यदा ते

कुमारस्य दृक्पथं प्राप्तास्तदा तेन चिंतितं, नूनमेते त एव योगिनः संभाव्यंते. अतोऽत्र कापि बुद्धिश्चालनीया, यतः—ज्यां होये सही बुद्धडी । न होय तिहां विणास ॥ सुर सर्वे सेवा करे । रहे आगल जिम दास ॥ ७० ॥ अथ तस्य कुमारस्य पार्श्वे पंच बाणा अभवन्. तन्मध्यात्तेनैको योगिसमक्षं भग्नः, तद् दृष्ट्वा तैर्योगिभिस्तद्भंगकारणं कुमारः पृष्टः, तदा कुमारेणोक्तं मया प्राग् यूयं पंच श्रुता अभवन्, तेन च मया युष्मद्वधाय पंच बाणा आनीता आसन्, परं सांप्रतं तु मया यूयं चत्वार एव दृष्टाः, तेन च मयैको बाणो भग्नः, किंच युष्माकं शुद्धिं कुर्वतो ममात्र वने बहूनि दिनानि जातानि, अद्यैव भवंतो मे दृष्टिपथं प्राप्ताः. तत् श्रुत्वा योगिभिश्चिंतितं नूनमेषः कोऽपि सत्ववान् रूपवान् तेजस्वी पुरुषो दृश्यते, तेन कमपि बुद्धिदंभं कृत्वामुं पाशे पातयामः. इति विचिंत्य ते कुमारंप्रति प्रोचुः, हे सत्पुरुष त्वां तु सुजनं दृष्ट्वा वयं तव सन्मुखमागताः स्मः, त्वं चास्माकमुपरि विरूपं चिंतयसि! वयं त्वेवं जानीमो यद्भवादृशानां संगतिस्तु भाग्येनैव लभ्यते. वयं तु संसारादुद्विग्ना योगिनः स्मः, अत्र पुनर्निर्जने वने त्वत्समागमतोऽस्मन्मनोनिर्वृत्तिर्जातास्ति. यतः—संसारभारखिन्नानां । तिस्रो विश्रामभूमयः ॥ अपत्यं सुकलत्रं च । सतां संगतिरेव च ॥ ७१ ॥ तत् श्रुत्वा कुमारेणाप्युक्तं भो योगिनो युष्माभिरेतत्सत्यमेवोक्तं,

यतः—संसारकटुवृक्षस्य । द्वे फले अमृतोपमे ॥ सुभाषितरसास्वादः । संगतिः सज्जने जने ॥ ७२ ॥ ततो योगिभिर्बहुमानपुरस्सरं स रूपसेनकुमारः स्ववटवृक्षस्याधो नीतः, ततस्तैः कुमारस्याग्रे कपटेन वैराग्यमयी वार्ताः कथिताः. ततः कुमारेण तेभ्यः पृष्टं, भो योगिनो युष्माकं व्रतग्रहणे कियंति वर्षाणि जातानि? तैरुक्तमस्माकं योगग्रहणे पंच शतानि वर्षाणि जातानि. तत् श्रुत्वा कुमारेणाप्युक्तं, अहो तर्हि तु पुरातनानां युष्माकं योगिनां दर्शनेन ममापि जन्म सफलं जातं.

एवंविधैर्मिष्टवचनैः कुमारोऽपि तान् प्रमोदयामास. यतः—प्रियवाक्यप्रसादेन । सर्वे तुष्यंति जंतवः ॥ तस्मात्तदेव वक्तव्यं । वचने का दरिद्रता ॥ ७८ ॥ अथ तैः कुमाराय विश्वासप्रतिपादनार्थं प्रोक्तं, भो कुमार! अतः परं त्वमात्मीय एवास्माकमसि, नापरः, तेन त्वदग्रे वयमस्माकं गुप्तवार्तामपि कथयामस्तां च त्वं शृणु? अस्माभिरस्मिन् वटे षड्वर्षाणि यावदेकमनसैका देवताराधिता, ततश्च सास्माकंप्रति संतुष्टा जाता. यतः—चलचित्तेन यज्जप्तं। जप्तं यन्मेरुलंघनैः ॥ नखाग्रेण च यज्जप्तं। तज्जप्तं निष्फलं भवेत् ॥ ७९ ॥ ततस्ते देवताधिष्ठितं सिद्धं वस्तुचतुष्टयं तस्मै कुमाराय दर्शयित्वा तत्प्रभावं चाकथयन्. ततस्तैरुक्तमेषां वस्तूनां विषयेऽस्माकं परस्परं विवादोऽस्ति, ततस्त्वं मध्यस्थीभूयास्माकं विभज्य

॥ १९ ॥

समर्पय? एषु मध्ये च या कंथास्ति सा कृतविस्तारा प्रतिदिनं पंचशतदीनारान् यच्छति. अनेन दंभेन ताडितं वस्तु निर्जीवमपि सजीवं भवति. पात्रं चैतत् सर्वदा लक्षमनुष्ययोग्यं भोजनं ददाति. पादुके चेमे मनोवांछिते स्थानके क्षणमध्ये प्रापयतः.

दीनारपंचशतदानपरा च कंथा। निर्जीववस्तुचिरजीवितदश्च दंडः॥ पात्रं च लक्षजनभोजनदायकं हि। श्रीपादुके च परदेशगतौ समर्थे ॥ ८० ॥ इति तेषां वस्तूनां प्रभावं श्रुत्वा कुमारेणोक्तं भो योगिनो यदि यूयं मदुक्तं करिष्यथ तदाहं युष्माकं सर्वेषामपि तुल्यमेव समर्पयिष्यामि, केषामपि नाधिकं न च न्यूनं दास्यामि. तद्विषये च भवद्भिर्मद्बुद्धिरपि विलोकनीया. तत् श्रुत्वा तैर्योगिभिरुक्तं हे कुमार अस्माकं त्वत्कृतं प्रमाणमेव. अथ कुमारेणोक्तं यूयं सर्वे चतुर्षु दिक्षु दूरं तिष्ठत? यस्यां दिशि यद्वस्त्वहं क्षिपामि तद्वस्तु तेन ग्राह्यं, परं यदाहं सम्यग् विभज्य तालिकात्रयं पातयामि तदैव भवद्भिरत्रागंतव्यं, तत्समयावधि च दूरं वृक्षांतरे पृष्टिं दत्वा स्थेयं, मत्सन्मुखं न विलोकनीयं. एवमस्त्वित्युक्त्वा ते दूरं गत्वा विचारयंति, यत् संप्रति कुमारोऽयं विश्वस्तो जातोऽस्ति, अथावसरे चैनमग्निकुंभे क्षिप्त्वा सुवर्णपुरुषं वयं निष्पादयिष्यामः. एतावतात्र कुमारेण ते पादुके स्वपादयोः परिहिते, दंडश्च हस्ते धृतः, पात्रकंथे च

स्वपृष्टौ बद्धे. ततस्तेन पादुकेप्रति प्रोक्तं भो पादुके युवां मां कनकपुरपत्तने प्रापयतं? तत्क्षणमेव स गगने समुत्पतितोऽनेकानि कौतुकानि विलोकयन् विमानस्थित इव गंतुं लग्नः, ततो गगनस्थेनैव तेन योगिनःप्रति कथितं, भो योगींद्रा मया युष्माकं सर्वेषामपि युक्तं कृतमस्ति, अथ भवद्भिर्मनसि किमपि नानेयं, यतो मया यूयं सर्वेऽपि किमप्यनर्पणात्तुल्या एव कृताः स्थ. एवं स तेषां प्रत्यक्षं तालीत्रयं दत्वा वेगेन गगने गच्छन् तद्दृष्टिपथातीतोऽभूत. अथ विलक्षीभूतास्ते व्यचिंतयन्नहो तेन धूर्तेन वयं प्रत्युत वंचिताः. उक्तं च—अन्यथा चिंतितं कार्यं। विधिना कृतमन्यथा॥ सरोंभश्चातकेनात्तं। गलरंध्रेण गच्छति ॥ ८१ ॥ अभिनवसेवकविनयैः। प्राघूर्णोक्तैर्विलासिनीरुदितैः॥ धूर्तजनवचननिकरै—रिह कश्चिदवंचितो नास्ति ॥ ८२ ॥ अरे तद्वंचनं चिंत्यमानाः प्रत्युत वयमेव वंचिताः, एवं ते विषण्णा योगिनो दुःखीभूताः संतो वने वने भ्रमंतिस्म, ग्रामे ग्रामे च भिक्षां मार्गयंतिस्म, एवं तैरिहलोकेऽपि परहत्याचिंतनपापस्य फलं प्राप्तं. कर्मणां गतिर्विषमास्ति, यतः—कृतकर्मक्षयो नास्ति। कल्पकोटिशतैरपि॥ अवश्यमेव भोक्तव्यं। कृतं कर्म शुभाशुभं॥ ८४॥ अथ ते योगिनश्चिरंतनं स्ववासस्थानं तं वटं मुक्त्वा परदेशे प्राप्ताः. इतश्च स रूपसेनकुमारः पुण्योदयप्रभावेण रत्नपुरसीम्नि एकायां शुष्कवाटिकायां समुत्तीर्णः.

तत्र च चंपकाधः स्थितश्चिंतयति, यत्पादुकयोः परीक्षा तु जाता, अथ दंडपरीक्षां करोमीति विचिंत्य तेन स शुष्कचंपकवृक्षो दंडेन वारत्रयं ताडितो द्रुतमेव पल्लवितः पुष्पितश्च. तद् दृष्ट्वा हृष्टेन तेन कुमारेण वाटिकागताः सर्वेऽपि शुष्कवृक्षा दंडेन वारत्रयं ताडिता नवपल्लवाः कृताः. एवं सा समस्तापि शुष्का वाटिका दंडप्रभावेण प्रफुल्लिता जाता.

अथ तन्मार्गेण गच्छंतो लोकास्तां शुष्कामपि वाटिकां क्षणतो नवपल्लवीभूतां विलोक्य विस्मिताः संतस्तद्वाटिकायाः स्वामिने मालिकाय तद्विषयां वर्धापनिकां प्रयच्छंतिस्म, परं स मालिकस्तां वार्ता न मानयति, किंतु मनसि चिंतयति चेत्कोऽपि देवस्तत्रागतः स्यात्तदा तद्देवप्रभावेणैव सा नवपल्लवा स्यात्, नान्यथा, इति विचिंत्य तेन मालिकेन तन्निश्चयकरणाय स्वपत्नी मालिनी तत्र प्रेषिता. सापि तत्रागत्य यावत् पश्यति, तावल्लोकोक्तं तत्सर्वं सत्यं विलोकयतिस्म. ततः सा वाटिकामध्ये गत्वा यावद्विलोकयति तावत्तया चंपकतरोरधः स दिव्यरूपः कुमारः सुप्तो दृष्टः. तं विलोक्य मालिन्या चिंतितं नूनमस्य दिव्य-पुरुषस्य प्रभावेणैवेयं वाटिका नवपल्लवा जातास्ति. तेन चायं कुमारो महापुण्यवान् संभाव्यते. यतः—

धरांतःस्थं तरोर्मूल—मुच्छ्रयेणानुमीयते ॥ अदृष्टोऽपि तथा प्राच्यो । धर्मो ज्ञायेत संपदा ॥ ८५ ॥ अथ

येनानेन पुरुषेण मदीया वाटिका नवपल्लवा कृतास्ति तस्य भक्तिं कुर्वे, इति विचिंत्य सा वाटिकातो मनोहरसुगंधिपुष्पाणि गृहीत्वा तेषां च चतुःसरं हारं निर्माय जागरणानंतरं कुमाराय प्राभृतीचकार. तदा कुमारेणाप्युचितदाने तस्यै सुवर्णटंक एको दत्तः. तं गृहीत्वा सा हृष्टा मालिनी कुमारंप्रति जगाद, भो सत्पुरुष मम गृहे पादाववधारयत? तत् श्रुत्वा कुमारेण चिंतितं नूनमेतद्धनदानफलमेवास्ति. ततः सा मालिनी तं रूपसेनकुमारं सार्थे समादाय ततश्चलिता, स्वगृहद्वारे तं संस्थाप्य स्वयं च गृहांतर्गत्वा तं गृहमध्ये समानयनाय स्वस्वामिनं मालिकंप्रत्यपृच्छत्. तदा स मालिको लकुटं समादाय धावित्वा तां कथयामास, रे रंडे यादृशांस्तादृशानज्ञातान् कथं त्वं गृहमध्ये समानयसि? मालिन्या भणितं स्वामिन् त्वं कोपं मा कुरु? एवंविधोऽतिथिस्तु भाग्येनैव लभ्यते, पुरुषाणां मध्येऽप्यंतरं वर्तते, यतः—

वाजिवाहनलोहानां। काष्टपाषाणवाससां॥ नारीपुरुषतोयाना—मंतरं महदंतरं ॥ ८७ ॥ अस्यैव हि पुरुषस्य प्रभावेणास्माकं वाटिका नवपल्लवा जातास्ति, इति कथयित्वा तया कुमारार्पितो दीनारस्तस्मै दर्शितः. दीनारं दृष्ट्वा तु धनग्रथिल इव हृष्टो मालिकः प्रियांप्रत्युवाच, हे प्रिये एतस्य प्राघूर्णकस्यादरस्तु त्वया समीचीनः कर्तव्य इत्युक्त्वा स मालिकः स्वयमेव बहिर्गत्वा बहुमानपूर्वकं तं कुमारं स्वगृहमध्ये

समानीतवान्, कुशलप्रश्नादिभूरिसत्कारं च तस्य कृतवान्, यतः—एह्यागच्छ समाविशासनमिदं प्रीतोऽस्मि ते दर्शनात् । का वार्ता पुरि दुर्बलोऽसि च कथं कस्माच्चिराद् दृश्यसे ॥ इत्येवं गृहमागतं प्रणयिनं ये प्रश्नयंत्यादरा–त्तेषां युक्तमशंकितेन मनसा गंतुं गृहे सर्वदा ॥ ९८ ॥ परदेशे प्राप्तानामपि पुण्यवतां जनानां सर्वत्र बहुमानं स्यात्. अथ स कुमारस्तद्गृहे कोणैकमध्ये स्वकंथादिवस्तुचतुष्टयस्य ग्रंथिं बध्ध्वा मुमोच. ततोऽसौ नगरमध्ये गत्वा नवनवानि कौतुकानि विलोकयामास. तत्र स नृपावासमहेभ्यमंदिरहट्टश्रेणिचतुष्पथराजपथदेवकुलमठलेखशालादीनि ददर्श. एवं स नगरमध्ये भ्रमन् प्रत्यहं मनोहराणि स्थानानि विलोकयन् विलसतिस्म. अथैकदा कुमारे बहिर्गते तया मालिन्या सा कुमारसत्कवस्तुग्रंथिश्छोटिता, तन्मध्ये च योगिजनयोग्यानि कंथादिवस्तूनि दृष्ट्वा सा मनसि विषण्णा सती चिंतयामास, नूनमेष कोऽपि धूर्तो योगी संभाव्यते, व्यवहारिवेषेण च मद्गृहे तिष्टति. नूनं तेन वंचनार्थमेव मे सुवर्णटंको दत्तोऽस्ति, एवं च मां विप्रतार्य स यदि मदीयबालकानपनेष्य हनिष्यति, तदाहं किं करिष्यामि? मायाविनां हि सर्वथा विश्वासो न कार्यः. यतः–त्रिदशा अपि वंच्यंते । दांभिकैः किं पुनर्नराः ॥ देवी यक्षश्च वणिजा । लीलया वंचितावहो ॥ ९९ ॥ यथा देवपुरे कुलानंदमदनकलकाभिधौ दंपती

अपुत्रावास्तां, ताभ्यां पुत्रार्थं चामुंडायै दीनारत्रिलक्षी मानिता. जाते पुत्रे च पूर्वप्रतिपन्नं लक्षलक्षमूल्यं पुष्पत्रयं घटयित्वा स्थाले च क्षिप्त्वा स चामुंडाया मंदिरे समागतः. तेभ्य एकं चामुंडाया भाले शेषं द्वयं च तत्करयोर्मुक्त्वा प्रणामं च विधाय पश्चाद्गच्छता तेनैकं स्वस्य कृते, द्वितीयं स्वपत्नीकृते, तृतीयं च स्वपुत्रकृते एवं तत्पुष्पत्रयमपि तेन शेषापदे पश्चाद् गृहीतं. एवं च तत्पुष्पत्रयं पश्चाल्लात्वा स स्वगृहं ययौ. तदा खिन्नया तया चामुंडया देव्यैकस्य यक्षस्य स्वमित्रस्याग्रे स वृत्तांतः कथितः, तदा स यक्षः प्राह हे देवि सुष्टु जातं यत्त्वमखंडिता तस्माच्छुटिता, अहं तु तेन वणिजा बहु कदर्थितोऽस्मि, तद्वृत्तांतं शृणु? अनेन वणिजा प्रवहणसंकटे मह्यमेको महिषः प्रतिपन्नोऽभूत्. आगते च क्षेमेण यानपात्रे स एकं महिषमानीय तद्गलरज्जुं मद्गले बध्ध्वा युगपद्वाद्यानि वादयामास. तदा स त्रस्तो महिषो मामपि मूलादुत्पाट्य मह्यां घर्षयन् धावितुं लग्नः, ततस्त्रुटितरज्जुरहं पथि पतितो लोकैरुत्पाट्य मत्स्थाने स्थापितः. तद्घर्षणक्षतानि त्वद्यापि मां बाधयंतीत्युक्त्वा तेन देव्याः स्वांगगतघर्षणक्षतानि दर्शितानि. तानि च दृष्ट्वा सा चामुंडादेव्यपि विलक्षीभूताऽक्षतांगं स्वात्मानं धन्यं मन्यमाना मौनं विधाय स्थिता. अतोऽस्यापि धूर्तस्य मनःपरिणामो मया न ज्ञायते. अथ यदा सोऽत्रागमिष्यति तदा तं गृहमध्ये प्रवेष्टुमपि

न दास्यामीति विचिंत्य तया कुमारसत्कानि तानि वस्तूनि रोषाद् गृहपश्चाद्भागस्थे वाटके प्रक्षिप्तानि. इतस्तस्या मालिन्याः पार्श्वे एका प्रातिवेश्मिकी महिला समागता, तस्याः पार्श्वे तया तस्य धूर्तस्य स्वरूपं प्रोक्तं, प्रायः स्त्रीणां हृदये वार्ता न तिष्ठति. इतः स रूपसेनकुमारो नगरकौतुकानि विलोक्य तस्या गृहे समागतः, तदा सा मालिनी तेन सह कलहं कर्तुं प्रवृत्ता. तदा कुमारेणोक्तं हे भगिनि त्वं निर्हेतुकं विवादं कथं करोषि? यतः—वैरवैश्वानरव्याधि—वादव्यसनलक्षणाः ॥ महानर्थाय जायंते । वकाराः पंच वर्धिताः ॥ ९२ ॥ तेनाहं त्वया सह वादं न करिष्यामि, परं त्वं कथय तवाद्य किं संजातमस्ति? एवंविधो निबिडस्नेहस्तव क्व गतः? उक्तं च—पतंगरंगवत्प्रीतिः । पामराणां क्षणं भवेत् ॥ चोलमंजिष्टवच्छेषां । धन्यास्ते जगतीतले ॥ ९३ ॥ स्त्रीभिः सह ये स्नेहं कुर्वंति ते मूर्खा एव. इति कुमारवचनानि श्रुत्वा मालिनी प्रत्यूचे, अरे मया मुग्धयाद्यावधि तव धूर्तत्वं न ज्ञातं, त्वत्तुल्येन धूर्तपुरुषेण सह ये स्नेहं कुर्वंति त एव मूर्खाः, यतः—अभ्रच्छाया तृणादग्निः । खले प्रीतिः स्थले जलं ॥ वेश्यारागः कुमित्रं च । षडेते क्षुधितोपमाः ॥ ९४ ॥ तदा कुमारः प्राह, हे मालिनि त्वयाहं धूर्तः कथं ज्ञातः? यतः—मुखं पद्मदलाकारं । वाचश्चंदनशीतलाः ॥ हृदयं कर्तरीतुल्यं । त्रिविधं धूर्तलक्षणं ॥९५॥

मया त्वं कदा वंचिता? तदा मालिनी प्राह, भो धूर्त त्वं शृणु? मयाद्य तव ग्रंथिश्छोटयित्वा विलोकिता, तदा तन्मध्याद्योगियोग्यवस्तूनि दृष्ट्वा मया त्वत्स्वरूपं ज्ञातं, यतो धूर्ता ईदृशा एव स्युः, अतस्त्वं त्वन्निवासकृतेऽन्यत्स्थानं गवेषय? अतःप्रभृति त्वया मद्गृहे नागंतव्यं.

तत् श्रुत्वा कुमारोऽवदत्, अरे मालिनि नूनं त्वं मुग्धासि? कस्यापि दुर्जनस्य वचने लग्नासि, तेन च—कल्पवृक्षं करीरोऽयं । ज्ञात्वेति मां विमुंचसि ॥ राजहंसे स काकोऽयं । कुबुद्धिः कथमीदृशो ॥ १६ ॥ भवतु, मम स्थानानि बहून्यपि संति. यतः—अयं निजः परो वेति । गणना लघुचेतसां ॥ उदारचरितानां तु । वसुधैव कुटुंबकं ॥ १७ ॥ ततः कुमारेण मधुरवचसा तस्यै कथितं, हे भगिनि तर्हि तद्वस्तुग्रंथिं त्वं समर्पय? तत् श्रुत्वा तयोक्तं रे धूर्त मया तु तानि कंथापात्रादीनि वाटके प्रक्षिप्तानि. तदा कुमारः प्राह हे मुग्धे कुतस्त्वया तानि मज्जीविततुल्यानि वस्तूनि वाटके क्षिप्तानि? मया तव किमपराद्धमस्ति? ततस्तया तानि वस्तूनि वाटकात्समानीय तस्मै समर्पितानि. अथ कुमारेणोक्तं भो भगिनि! एषां कंथादिवस्तूनां महिमानं त्वं पश्य? त्वया तु रत्नान्येतानि कर्करधिया प्रक्षिप्तानि, कामकुंभस्त्वया मृन्मयो घटो ज्ञातः, प्रवालं गुंजाधिया मुक्तं, परमेषां वस्तूनां महाप्रभावोऽस्ति. तत् श्रुत्वा विस्मितया तया प्रोक्तं

तर्हि त्वं तत्प्रभावं दर्शय? अथ कुमारेण मंत्रोच्चारपूर्वकं सा कंथा यावद्विस्तृता तावत्तस्या मध्याद्दीनाराणां पंचशती तत्र निपतिता. ततः कुमारेण तस्यै मालिन्यै प्रोक्तं भो भगिनि अथैतद्धनं त्वं गृहाण? यदियंतिदिनान्यहं तव गृहे समाधिना स्थितोऽभूवं. अथ विस्मितया मालिन्या तद्धनं गृहीतं. इत उत्तममध्यमजनानामंतरं विलोक्य सा प्रातिवेश्मिकी तं कुमारं कल्पवृक्षतुल्यं ज्ञात्वा प्राह, भो सत्पुरुष त्वं मम गृहे समागच्छ? सुखेन च चिरकालं तिष्ट? यदि बहूनि भाग्यानि भवेयुस्तदैव त्वादृशा अतिथयो गृहे समागच्छेयुः. तदा पश्चात्तापं प्राप्तया तया मालिन्या प्रोक्तं, अरे अयं कुमारस्तु मद्गृहे एव स्थास्यति, मयैवायं वने गत्वा मद्गृहे समानीतोऽस्ति. कथं त्वं कलहकरणार्थं मद्गृहे समागतासि? याहि स्वगेहं? एवं तयोरन्योन्यं वादः समभूत्. ततः कुमारेणैते उभे अपि कलहकरणतो निवारिते.

अथ कुमारो मालिनींप्रति जगाद, हे मालिनि! त्वया तु मह्यं कथितमस्ति, यद्भवता मद्गृदे न स्थातव्यं तर्ह्यधुनानया प्रातिवेश्मिक्या सह त्वं कलहं कथं करोषि? नूनमत्र धनमेव कारणमस्ति. यतो यदा वनवासे गच्छंतौ रामलक्ष्मणौ वशिष्टं गुरुं वंदितुं तदाश्रमे गतौ, तदा तौ निर्धनौ ज्ञात्वा वशिष्टेनापि संप्रत्यहं ध्याने स्थितोऽस्मीति स्वशिष्यमुखेन ताभ्यां ज्ञापितं. ततस्तौ तमवंदित्वैवाग्रे वने गतौ.

ततस्तौ लंकायां गत्वा रावणं च विजित्य बहुपरिवारर्धियुतौ पुनरयोध्यायामागच्छंतौ मार्गे तापसाश्रमे वशिष्ठं वंदनार्थमागतौ, तदा वशिष्ठोऽपि तत्सन्मुखमागतो बहुमानं ताभ्यां दत्तेस्म. आशीर्वादपुरस्सरं च तेन तयोर्बहुरादरसत्कारः कृतः. तदा रामेण वशिष्टंप्रति प्रोक्तं—स एवाहं स एव त्वं । स एवायं त्वदाश्रमः ॥ गमनावसरे नाभू–दधुना तु किमादरः ॥ १ ॥ वशिष्ट उवाच—स एवाहं स एव त्वं । स एवायं मदाश्रमः ॥ तदा त्वं निर्धनो राम । सांप्रतं तु धनेश्वरः ॥ २ ॥

तेन च–धनमर्जय काकुस्थ । धनमूलमिदं जगत् ॥ अंतरं नैव पश्यामि । निर्धनस्य मृतस्य च ॥ ३ ॥ तथा भो मालिनि त्वमपि तादृश्येवासि. किं च यत्र विरंग उत्पद्यते तत्र तु क्षणमपि न स्थेयं. इत्युक्त्वा स्वकंथादि गृहीत्वा रूपसेनकुमारो यावत्तत उत्तिष्टति, तावत्तया मालिन्या हठेन तद्धस्तात्कंथा-पात्रादिग्रंथिं गृहीत्वा स्वगृहमध्ये मुक्ता. ततश्च सा तं क्षामयामास, तदा कुमारेण चिंतितं नूनमेष सर्वो दानमहिमास्ति. यतः—याचके कीर्तिपोषाय । स्नेहपोषाय बंधुषु ॥ सुपात्रे पुण्यपोषाय । दानं क्वापि न निष्फलं ॥ ४ ॥ अथ तया हृष्टया मालिन्योक्तं भो कुमार अतःपरं त्वं मे बांधवोऽसि, अत्र च परमपुरुष एव साक्षी. ततः कुमारोऽपि सुखेनैव तद्गृहे स्थितः. एकदा च तेन तद्दंडादिशेषवस्तुत्रयाणामपि

प्रभावस्तस्या अग्रे प्रकटितः. शास्त्रे निषिद्धमपि तस्या अग्रे स्वगुप्तवार्ता तेन प्रकटिता, यतः—

स्त्रीणां गुह्यं न वक्तव्यं । प्राणैः कंठगतैरपि ॥ नीतो हि पक्षिराजेन । पद्मरागो यथा फणी ॥ ५ ॥

ततस्तौ भगिनीबांधवौ परस्परं निबिडस्नेहौ जातौ. अथैकदा तौ स्वावासोपरितनभूमिस्थितौ नगररचनां पश्यतःस्म. इतो निकटे कुमारेणैकः सप्तभूमिक आवासो दृष्टः, तदा तेन मालिन्यै पृष्टं, हे भगिनि एष कस्यावासो दृश्यते? तयोक्तं हे भ्रातरिदं कनकपुराभिधं पत्तनमस्ति, अत्र च कनकभ्रमाख्यो राजा राज्यं करोति, तस्य च कनकमालाभिधाना पट्टराज्ञी वर्तते, तत्कुक्षिसंभवा कनकवत्यभिधाना चैका पुत्री विद्यते. सा कनकवती विद्याद्यनेकगुणालंकृता साक्षात्सरस्वतीवास्ति. किंच सा सर्वोत्तमस्त्रीलक्षणयुता चतुःषष्टिकलानिपुणात्रावासे वसति.

अहं च पुष्पाणि गृहीत्वा तस्या अर्पणार्थं सर्वदा तत्र यामि, अस्यावासस्य षष्ट्यधिकत्रिशतमितानि द्वाराणि संति, चतुरशीतिगवाक्षाश्च वर्तंते, वर्षमध्ये प्रतिदिनं च सैकैकं वारकेण द्वारमुद्घाटयति, तेन द्वारेण च सा नगरकौतुकानि पश्यति, राज्ञ आदेशं विना च सा दृष्टिदोषभयाद् बहिर्न निस्सरति. तत् श्रुत्वा कुमारेण पृष्टं, हे भगिनि इदमात्मगृहसन्मुखं तस्य प्रासादस्य द्वारं कस्मिन् दिने उद्घटिष्यते?

साऽवदत्तदहं सम्यग् न जानामि. अथैवं वार्तां कुर्वतोस्तयोः कनकवत्या तद्गृहसन्मुखं तदेव द्वारमुद्घाटितं. तदा कुमारोऽपि हृष्टः, यत उत्तमानां मनोरथास्तु चिंतितमात्रा एव सिध्ध्यंति. यतः—रे चित्त खेदमुपयासि मुधा किमत्र । रम्येषु वस्तुषु मनोहरतां गतेषु ॥ पुण्यं कुरुष्व यदि तेषु तवास्ति वांछा। पुण्यैर्विना न हि भवंति समीहितार्थाः ॥ ९ ॥

अथ शुभपुण्यकर्मयोगेन भवितव्यतया च तस्याः कुमार्या दृष्टिः कुमारोपरि पतिता, तेन कुमारस्यापि हर्षो जातः. अथ तां दृष्ट्वा कुमारेण चिंतितमहो अस्या रूपनिर्माणं! अथ तयोर्नेत्रमिलनतः परस्परं स्नेहः समुत्पन्नः. अथ कनकवत्या मनसि चिंतितं, मत्पिता मदर्थं सर्वदा वरं गवेषयति, परं तादृशो योग्यो वरो न लभ्यते, परं दैवयोगेन चेदसौ महापुरुषो मम वरः स्यात्तदैव मे जन्म सफलं, मम मनस्त्वनेनैवाद्य हृतमस्ति. अतोऽस्मिन् जन्मनि तु ममैष एव स्वामी भवतु, अन्यथा मम मरणमेव शरणं. अथ ममैनमभिलाषमहं कस्याग्रे कथयामि? यतः—सो कोवि नत्थि सुजणो । जस्स कहिज्जंति हिअयदुक्खाइं ॥ हियए उप्भंति उक्कंठे । पुणोवि हियए विलिज्जंति ॥ ११ ॥ ततः प्राग्भवस्नेहनिबंधनेन कुमारस्य मानसेऽपि तथैवाभिलाषो जातः, यतः—दृष्टाश्चित्रेऽपि चेतांसि । हरंति हरिणीदृशः ॥ किं

पुनस्ताः स्मितस्मेर–विभ्रमभ्रमितेक्षणाः ॥ १२ ॥ अहोऽस्या दृग्चातुरी ! विदग्धवनितायाश्च । संगमेनापि यत्सुखं ॥ क्क तत्प्राकृतनारीणां । गाढालिंगनचुंबनैः ॥ १३ ॥ अथैतयोर्दुरस्थयोरपि रविराजीवयोरिव परस्परं विलोकयतोः कोऽपि नव्यः स्नेहरसः प्रादुर्बभूव. यतः—दूरस्थोऽपि न दूरस्थो । यो वै मनसि वर्तते ॥ हृदयादपि निष्क्रांतः । समीपस्थोऽपि दूरगः ॥ १४ ॥ अथ कुमारो दध्यौ, चेदस्याः कन्यायाः पाणिग्रहणं मया सह स्यात्तदा मम पुण्योदय एव, कथमप्येकवारमपि चेत्तया सह मिलनं स्यात्तदापि मे भाग्योदयः. परं तत्सर्वं मे मनोवांछितं प्राक्तनपुण्येनैव जिनधर्मप्रसादाच्च भविष्यति. यतः–जिनधर्मं विना नृणां । न स्युर्वांछितसिद्धयः ॥ सूर्यं विना न कोऽपि स्या—द्राजीवानां विकासकः ॥ १७ ॥

अथ सा कनकवती स्वमनसि चिंतयति, नूनमस्य वैदेशिकस्य विद्यावतः कापि कला यदि भविष्यति, तदा स स्वयमेव कयापि बुध्ध्या केनाप्युपायेनात्र मम पार्श्वे समागमिष्यतीति चिंतयंती सा चक्रवाकीव तमेव ध्यायंती तस्थौ. अथ रूपसेनकुमारस्तत्सकलमपि दिनमतिवाह्य सायं सज्जीभूय लोकप्रचाररहितायां रात्रौ पादुकाप्रयोगेणाकाशमार्गेण तस्या कनकवत्या मंदिरे प्राप्तः. तदा देवकुमारसदृशं तमेव तत्रागतं विलोक्य राजकुमारी ससंभ्रमं समुत्थिता. यतः–संभ्रमः स्नेहमाख्याति । देशमाख्याति

॥ ३२ ॥

भाषितं ॥ आचारः कुलमाख्याति । वपुराख्याति भोजनं ॥ १८ ॥ अथ तस्य राजकुमारस्य दर्शनमात्रतस्तस्या मनः प्रफुल्लितं. ततस्तया तस्य वरासनदानादिभिर्बहुमानपुरस्सरं प्रतिपत्तिः कृता. ततस्तयोक्तं हे स्वामिन् कथमत्र भवतामागमनं जातं? का बुद्धिर्भवता विरचिता? यतोऽत्र मदावासरक्षणार्थं मदीयपित्रा सायुधाः सप्तशतप्राहरिका मुक्ताः संति, अतः प्रतोलीमार्गेणात्रागमनं प्राणिनां दुष्करमेवास्ति. तत् श्रुत्वा राजकुमारः प्राह, हे कामिनि अहं तु देव इव विद्याबलेन सर्वत्रापि गच्छामि. अथ तया चिंतितं नूनमेष सर्वकलावान् दृश्यते, ततो यद्येष मे स्वामी स्यात्तदा तु मम पुण्यतरुः फलित एव. इति विचार्य तयोक्तं हे सत्पुरुष अथ त्वं मम पाणिग्रहणं कुरु? कुमारेणोक्तं हे सुंदरि! त्वं तु विलासवती राजकुमार्यसि, अहं च वैदेशिकोऽस्मि, तेनावयोः संयोगः कथं घटते? किंच यदि प्रतिपन्नं निर्वाहितं स्यात्तदैव कृतः स्नेहोऽपि सुखकरः. यतः—कज्जेण विणा नेहो । अत्थविहूणाण गोरवं लोए ॥ पडिवन्ने निव्वहणं । कुणंति जे ते जए विरला ॥ २० ॥

कनकवत्योक्तं हे स्वामिन्नतः परं तु मम त्वत्पदकमलमेव शरणं, उक्तेन बहुना किंवा । किं कृतैः शपथैर्घनैः ॥ वदामि सत्यमेवैत—त्त्वमेव मम मानसे ॥ २१ ॥ अथेति तस्या निश्चयं ज्ञात्वा कुमारेणापि

तदुक्तं स्वीकृतं. अथ सा तत्र कलशचतुष्टयेन चतुरिकां विधाय दीपसाक्षिकं तस्य रूपसेनकुमारस्य पाणिग्रहणं चकार. ततस्तया सह भोगविलासं विधाय कुमारः पुनर्मालिन्या गृहे गत्वा सुप्तः. एवं स रूपसेनकुमारः सर्वदा प्रच्छन्नरीत्या तदावासे गमनागमनं करोतिस्म, तया सह भोगसुखान्यनुभवति च. एवं च तयोर्दंपत्योर्वार्ताविनोदादिभिः सुखमयः कालो गच्छति. यतः—गीतशास्त्रविनोदेन । कालो गच्छति धीमतां ॥ व्यसनेन हि मूर्खाणां । निद्रया कलहेन वा ॥ २२ ॥ अथैकदा तस्या धर्मपरीक्षार्थं कुमारो जगाद—अठ्ठ मुह नयण सोलस । पनरस जीहाओ चलणजुअलं च ॥ दुन्नि जीय दुन्नि करयल । नमामि हं एरिसं देवं ॥ २३ ॥ तयोत्तरं दत्तं 'श्रीपार्श्वनाथः' अथ तया पृष्टं—उप्पन्नविमलनाणं । लोयालोयप्पयासदक्खोवि ॥ जं केवली न पासइ । तं दिठ्ठं अज्ज राइए ॥ २४ ॥ कुमारेण प्रत्युत्तरं दत्तं 'स्वप्नं' पुनः कुमारेण पृष्टं—का चीवराण पवरा । मरुदेसे किंच दुल्लहं होइ ॥ किं पवणाओ चवलं । दिवसकयं किं हरइ पावं ॥ २५ ॥ तयोक्तं 'पडिक्कमणं' एवं समश्याशकुनस्वप्नज्योतिःशास्त्रादिवार्ताविनोदैस्तयोः सुखलीनयोः कालो गच्छति. यतः—कलाभ्यासैर्गुणोल्लासै-रेनोनाशैः कथारसैः ॥ मिथोहासैर्दिनानीह । यांति भाग्यवतां सदा ॥ ३३ ॥

अथ क्रमेणोद्भिन्नयौवनां कुमारीं दृष्ट्वा सर्वा दास्यो भीताः सत्यस्तद्वृत्तांतं पट्टराज्ञ्यै ज्ञापयामासुः. राज्ञ्या पृष्टास्ता जगुर्हे स्वामिनि वयमेतद्विषये किमपि न जानीमः, परं कुमारीमुद्भिन्नयौवनां वीक्ष्य वयमित्यनुमानं कुर्महे, यत्कोऽपि विद्याधरो भूचरो वाऽदृष्ट एव पुरुषो नूनं कुमारीपार्श्वे समागत्य तया सह दुराचारं सेवते; वयं त्वेतन्निवेदयामः, पश्चादस्माकमुपरि दोषो न देयः. अथ विषण्णा राज्ञी तं वृत्तांतं नृपाय जगौ. तदा विस्मितेन राज्ञापि तद्विषये मंत्रीश्वराः पृष्टाः, तदा तैरुक्तं हे स्वामिन् तत्र तु सप्तशतमिता आराक्षका रक्षिताः संति, तन्मध्यात्तत्र चेत्कोऽपि समागच्छति तदा तस्य महत् साहसं नूनं ज्ञेयं, परमत्र कोऽपि भेदो ज्ञायते, यतः—भेदेन दुर्गा गृह्यंते। भेदाद्राज्यं विनश्यति। भेदाद्गृहे कलिर्भेदाद् । द्रव्यं चौरा हरंति च ॥३४॥ ततः क्रुद्धेन नृपेण ते सप्तशतमिताः प्रतोलीप्राहरिकाः स्वसमीपे समाकारिताः, पृथक्पृथक् च पृष्टास्ते कथयामासुः, हे राजन् वयं तु तद्वार्तामपि न विद्मः. राज्ञोक्तं रे दुष्टा यूयं तत्रारक्षकाः संतः कथं तद्वार्तां नाधिगच्छथ? को जीवितव्यादुद्विग्नोस्ति? कस्य ममापि भयं नास्ति? अहं युष्माकं सर्वेषामपि शिक्षां करिष्यामीत्युक्त्वा राज्ञा तलारक्षकमाहूय तेषां सर्वेषामपि चौरदंडकरणाय समादिष्टं. यदि चैते कुमारिकाप्रासादप्रवेष्टारं दर्शयंति तदैव मोच्याः. अथ तलारक्षे-

णापि विविधप्रकारैः पृष्टा अपि ते भयेन कंपमानास्तदेवाहुः, यत् हे स्वामिन्नत्र विषये वयं किमपि नो जानीमः. तदा तलारक्षो नृपादेशेन तान् सर्वानपि शूलायामारोपणार्थं चतुष्पथे समानयामास. तत्र बहवः पौरलोका मिलिताः, नगरमध्ये महाहाहारवो जातः, ते च कथयितुं लग्नाः, अरे स कोऽपि किं नगरे नास्ति? य एतेषां मरणभयं निवारयति. अथ तत्र नगरे वेश्यानां सप्तशतगृहाणि संति, ताभिर्वेश्याभिर्मिलित्वा तेषामारक्षकाणां दययेति राज्ञे विज्ञप्तं, हे स्वामिन् केनापि धूर्तेनायमन्यायः कृतोऽस्ति, एते आरक्षकास्तु मुधैव मार्यंते, तेन चान्येन पापं कृतं, तदर्थं चान्येषामयं दंडो जायमानोऽस्ति, यथा–

दुष्टाश्रयाददुष्टेऽपि । दंडः पतति दारुणः ॥ मत्कुणानामधिष्टानात् । खट्वा दंडेन ताड्यते ॥ ३८ ॥

राज्ञोक्तं नूनमकृतं पापं हठात्कस्यापि न लगति, उक्तं च–यो यत्कर्म करोत्यत्र । तत्तद्भुंक्ते स एव हि ॥ न ह्यन्येन विषे भुक्ते । मृत्युरन्यस्य जायते ॥ ३९ ॥ वेश्याभिरुक्तं हे स्वामिन् तत्सर्वं सत्यं, परं मासैकमध्ये वयं तं दुष्टाचारिणं नूनं शोधयित्वा भवतोऽर्पयिष्यामः, अन्यथा ते आरक्षका वयं च सर्वा अपि गृहसर्वस्वदंडपूर्वकं भवता शूलायामारोपणीयाः, अतो मासं यावत्तेभ्योऽभयदानं प्रयच्छ? राज्ञापि तासां विज्ञप्त्या तत्प्रतिपन्नं. पौरा अपि हृष्टाः संतस्तासां वेश्यानां साधुकारमवदन्. अथ वेश्यानां सा प्रतिज्ञापि

सर्वत्र प्रसिद्धाभूत्.

ततस्तासां वेश्यानां मध्ये या मुख्या वेश्यासीत्तया स्वबुध्ध्या सिंदूरमानाय्य राजकन्यायाः प्रासादे तस्याः पल्यंकस्य परितः स सिंदूरः सर्वतो विकीर्णः. अथ ते प्राहरिका अपि सर्वे सावधानाः संतो रात्रौ तत्र रक्षां कुर्वंतिस्म. ततः संध्यायां कुमारतस्तथैव गगनमार्गेण तत्र समागतः, तदा कुमार्या तस्मै प्रोक्तं हे स्वामिनद्य तु राजसभायां वेश्याभिर्मिलित्वा भवद्ग्रहणप्रतिज्ञा कृतास्ति, तत् श्रुत्वा कुमारेणोक्तं हे प्रिये तद्विषये त्वया मनसि किमपि भयं नानेयं. राजकुमारी पुनरुवाच, हे स्वामिन् ताभिरत्रेदं सिंदूरकपटं रचितमस्ति, तेन न जानेऽथ किं भविष्यति? अतस्त्वयापि सावधानतया स्थेयं, कापि बुद्धिश्च चिंतनीया. अथ स रूपसेनकुमारस्तत्र कियतीं वेलां स्थित्वा पुनर्मालिनीगृहे च समागत्य तानि सिंदूरखटितवस्त्राणि त्यक्त्वा स्नानं कृत्वा नव्यवस्त्राणि च परिधाय व्यवहारिवेषेण चतुष्पथे गतो नानाविधान्याश्चर्याणि पश्यतिस्म, पौरवार्तां च शृणातिस्म. अथ द्वितीयदिने कुमार्यावासे सा मुख्या वेश्या समागता सती सिंदूरमध्ये पुरुषपदानि विलोकयामास. ततः सा नगरमध्ये भ्रमंती सिंदूराक्तपादस्य तस्य पुरुषस्य गवेषणं चकार, परं तया स क्वापि न लब्धः. कुमारस्तु प्रतिदिनं राजकुमार्या आवासे

समागत्य विषयसुखं तया सह भुक्त्वा तथैव करोति. एवं चैकोनत्रिंशद्दिनानि जातानि, ततो वेश्या अपि सर्वाः किंकर्तव्यमूढाः संजाताः सत्यश्चिंतयामासुरहोऽस्माकमप्येतद्रिंछग्राहकपुरुषस्येव संजातं. यथा राजगृहवासी कोऽपि पुमान् ग्रामांतरं व्यवसायार्थं धनं गृहीत्वा मार्गे गच्छन्नासीत्. एवं तस्य वनमध्ये गच्छतो मार्गे एको रिंछो मिलितः, तं हंतुं यावत्स रिंछस्तत्पृष्टे धावितस्तदा तत्क्षणं तेन पुंसा स रिंछः कर्णयोर्धृतः. अथ यथा यथा स रिंछस्तं हंतुमिच्छति तथा तथा स तस्य कर्णौ बाढं गृह्णाति, एवं च कुर्वतस्तस्य कटितः सा दीनारवंशिका त्रुटिता, ततः कियंतो दीनाराश्च भूमौ पतिताः. एवं च तद्वंशिकात एकैको दीनारो भूमौ पतति.

इतस्तत्र कोऽपीभ्यस्तत्र मार्गे समागच्छंस्तं तथा कुर्वंतं दृष्ट्वाऽपृच्छत्, भो पुरुष त्वयैतत्किं क्रियमाणमस्ति? तत् श्रुत्वा समुत्पन्नबुद्धिना तेनोक्तमसो रिंछः कर्णयोर्मर्द्यमानो दीनारान् मुंचति. तत् श्रुत्वा लोभाभिभूतः स इभ्यो जगाद, हे सत्पुरुष तर्ह्येनं रिंछं मह्यं देहि? यथाहमपि कियतो दीनारान् समर्जयामि. तेनोक्तमहो एवंविधो धनप्रदो रिंछो मया तुभ्यं कथं दीयते? इभ्येनोक्तं भो सत्पुरुष त्वं कृपापरोऽसि, ततो मह्यमसो रिंछो दीयतां? एवमभ्यर्थितेन पुंसापि तस्येभ्यस्य हस्तयोस्तस्य रिंछस्य कर्णौ

दत्तौ. इभ्येनापि तत्कर्णौ स्वहस्ताभ्यां बाढं गृहीतौ. ततः स पुमान् भूमिपतितस्वदीनारान् गृहीत्वाग्रे चलितः. इभ्योऽपि दीनारवांछया तस्य रिंछस्य कर्णौ बाढं मर्दयामास. अथ दूरं गत्वा तेन पुंसा तस्येभ्यस्योक्तं भो मित्र किं तव दीनारलाभो जातः? इभ्येनोक्तं हे मित्र असौ रिंछस्तु मां हंतुमिच्छति. तेनोक्तं तर्ह्येनं मुंचेत्युक्त्वा स तु वेगेन ततः पलायितः. अथ स इभ्यो न च तं रिंछं मोक्तुं गृहीतुं वा शक्नोति. एवं लोभाभिभूतेन तेन परकीयं दुःखं स्वस्योपरि गृहीतं. तद्वदस्माभिरपि केवलं कीर्तिवांछयैतन्मरणरूपं परकीयं दुःखं स्वायत्तीकृतं, अथ राज्ञः सकाशात्कथं छुटिष्यते? एवं ते आरक्षकास्ता वेश्याश्च भृशं विलक्षा जाताः. अथ राजा तु कोपाज्जाज्वल्यमानस्वांतः साक्षात्कृतांत इव सभायामागत्य ता वेश्याः समाहूयोवाच, अरे वेश्या युष्मद्भिरप्यहं मासं यावद्विप्रतारितः, अथ पश्यत मत्कोपफलं? इत्युक्त्वा राजा तलारक्षकमाकार्योक्तवान्, भो तलारक्ष! एताः सर्वा अपि वेश्याः सर्वानारक्षकांश्च पुरमध्ये बाढं विडंब्य गृहसर्वस्वग्रहणपूर्वकं शूलायामारोपय? अथात्र विषयेऽहं पुनर्न पृष्टव्यः. राज्ञ इत्यादेशं श्रुत्वा सभाजना अपि खेदं प्राप्ताः संत इति चिंतयामासुः—माता यदि विषं दद्यात् । पिता विक्रयते सुतं ॥
राजा हरति सर्वस्वं । पूत्कर्तव्यं ततः क्व च ॥ ४४ ॥ अथ सा वार्ता नगरमध्येऽपि प्रसिद्धा जाता.

लोकाः परस्परं वदंति यदेकेन केनापि पापं कृतं, अनर्थस्त्वयं सर्वेषामप्यभवत्. तथा चोक्तं—रावणेन कृते पापे । राक्षसानां तु कोटयः ॥ हताः श्रीरामभक्तेन । कुपितेन हनूमता ॥ ४५ ॥ अथ मंत्रिभी राज्ञे विज्ञप्तं, हे स्वामिन्नेतासां वेश्यानां वधकरणे हि महान् दोषोऽस्ति, शास्त्रेऽपि स्त्रीणां वधो निषिद्धोऽस्ति, तथाहि—समणा गावो वेसा । इत्थीओ बालरोगिवुड्ढा य ॥ एए न हु हंतव्वा । कयावराहावि लोएवि ॥ ४६ ॥ तत् श्रुत्वापि कुपितेन राज्ञा मंत्रिवचो न मानितं, प्रत्युत कर्कशवचनैस्तेन मंत्र्यपि तर्जितः. पुनर्मंत्रिणोक्तं, हे स्वामिन् मया त्वेतद्भवतो हितार्थमुक्तमस्ति, अतो भवतां मह्यं प्रत्युत कर्कशवचनैस्तर्जनं न युक्तं. यतः—विरज्यते परिवारो । नित्यं कर्कशभाषया ॥ परिवारे विरक्ते तु । प्रभुत्वं हीयते नृणां ॥ ४७ ॥ इतश्चतुष्पथमध्ये महान् कोलाहलो जातः, बहवो लोकास्तत्र मिलिताः, भयभीताः परस्परं कथयंति, अरे एतेषां चोराणां समीपे स्थातुमपि युक्तं न, यतः—सर्वथा चौरसंगो हि । विपदे व्रतशालिनां ॥ जलहारिघटीपार्श्वे । ताड्यते पश्य अल्लरी ॥ ४८ ॥ तावता स रूपसेनकुमारोऽपि नगरकौतुकानि विलोकयंस्तत्र समागतः, लोकानां हाहाकारं श्रुत्वा चतुर्दशशतमनुष्याणां वधं च विज्ञाय तस्य मनसि दया समुत्पन्ना. यतः—धर्मो जीवदयातुल्यो । न कोऽपि जगतीतले ॥ तस्मात्सर्व-

प्रयत्नेन । कार्या जीवदया नृभिः ॥ ४८ ॥ एकस्मिन् रक्षिते जीवे । त्रैलोक्यं रक्षितं भवेत् ॥ घातिते घातितं तद्धि। तस्माज्जीवान्न घातयेत् ॥ ५० ॥ न हिंसासदृशं पापं । त्रैलोक्ये सचराचरे ॥ हिंसको नरकं
॥ ४१ ॥ गच्छेत्। स्वर्गं गच्छेदहिंसकः ॥ ५१ ॥ स्कंदपुराणेऽप्युक्तं—इह चत्वारि दानानि। प्रोक्तानि परमर्षिभिः॥ विचार्य नानाशास्त्राणि। शर्मणेऽत्र परत्र च ॥ ५२ ॥ भीतेभ्यश्चाभयं दानं। व्याधितेभ्यस्तथौषधं ॥ देया विद्यार्थिनां विद्या । देयमन्नं क्षुधातुरे ॥ ५३ ॥ ज्ञानवान् ज्ञानदानेन । निर्भयोऽभयदानतः ॥ अन्नदाना-त्सुखी नित्यं । निर्व्याधिरौषधाद्भवेत् ॥ ५४ ॥ अथ ममैकस्याप्यन्यायवतः कृते एतेषां सर्वेषामपि मरणं भविष्यति, स्त्रीहत्यापातकं च लगिष्यति, तदानेन जीवितेनापि किं? यतः—अमेध्यमध्ये कीटस्य । सुरेंद्रस्य सुरालये ॥ समाना जीविताकांक्षा । तुल्यं मृत्युभयं द्वयोः ॥ ५५ ॥ अथैतेषां सर्वेषामपि जीवाना-महं रक्षां करोमि, यतः–इक्कस्स कए निअजीवि–अस्स बहुआओ जीवकोडीओ ॥ दुक्खे ठवंति जे पुण। ताण किं सासयं जीअं ॥ ५७ ॥ इति विचिंत्य स पापभीरू रूपसेनकुमारः स्वगृहे गत्वा तानि सिंदूर-खरंटितानि वस्त्राणि च परिधाय सर्वेषु पौरेषु पश्यत्सु सत्सु नृपसभाद्वारे समागतः, प्रतिहारमुखेन राजानं च निवेदयामास यद्भवतां मुखकमलदर्शनार्थं कोऽपि वैदेशिकः समागतोऽस्तीति. ततो नृपा- ॥ ४१

देशेन प्रतिहारेण प्रेषितः स राजसभायां प्राप्तो राजानं प्रणम्य योग्यस्थाने समुपाविशत्. अथ महातेजस्विनं तं रूपसेनकुमारं दृष्ट्वा सभ्या विचारयामासुः, यत्किमयं देवकुमारो वा विद्याधरो वा सहस्रकिरणो वा शीतकरोऽस्ति? तावता तत्र स्थितया तया मुख्यवेश्यया सिंदूरारुणानि तस्य वस्त्रादीनि विलोक्य राज्ञे ज्ञापितं, हे स्वामिन्नेष एव पुरुषः कुमार्या आवासे गत्वा तया सहानाचारं सेवते. तत् श्रुत्वा विस्मितेन राज्ञा तस्यै पृष्टं, भो वेश्ये त्वयैतत्कथं ज्ञातं? ततस्तया तस्य सिंदूरलिप्तवस्त्राद्यभिज्ञानं दर्शितं. अथ राज्ञा तद्विषये पृष्टो रूपसेनकुमारः प्राह, हे स्वामिन् वेश्ययोक्तं सर्वमपि सत्यमस्ति, एतद्राजविरुद्धं कर्म मयैव कृतमस्ति, अतो ममैव दंडः कार्यः, अपरे चेमे सर्वेऽपि मोचनीयाः, एतेषां केषामप्यत्र दोषो नास्ति. तद्वचनानि श्रुत्वा सर्वेऽपि सभालोका विस्मिताः संतश्चिंतयामासुरहो तैले मक्षिकावदयमत्र कुतः समापतितः, अहोऽमुष्य कीदृशं साहसमस्ति! मुखे च काष्ण्यमपि नास्ति. यतः—संतो न यांति वैवर्ण्य—मापत्सु पतिता अपि ॥ दग्धोऽपि वह्निना शंखः । शुभ्रत्वं नैव मुंचति ॥ ५८ ॥ तथा च—विपदि धैर्यमथाभ्युदये क्षमा । सदसि वाक्पटुता युधि विक्रमः ॥ यशसि चाभिरुचिर्व्यसनं श्रुतौ। प्रकृतिसिद्धमिदं हि महात्मनां ॥ ५९ ॥ अथ राज्ञोक्तं—धृष्टो दुष्टश्च पापिष्टो । निर्लज्जो निर्दयः कुधीः॥

निःशूकश्च भवेत्क्रूर । एतच्चौरस्य लक्षणं ॥ ६० ॥ अतः सभायां धाष्ट्र्येन वदन्नयमेव नूनं चौरो ज्ञायते. ततः कुपितो नृपस्तलारक्षमाकार्यादिदेश, भो तलारक्ष अथ विलंबं विनैवैनं पापाधमं चतुष्पथेषु विडंबनापूर्वकं भ्रामयित्वा शूलायामारोपय? एवं चात्रैव मिलितं तस्य पापफलं लोकानामपि दर्शय? यतः–दुष्टानां दुर्जनानां च । पापिनां क्रूरकर्मणां॥ अनाचारप्रवृत्तानां। पापं फलति तद्भवे ॥ ६१ ॥ तत् श्रुत्वा तलारक्षेणोक्तं हे स्वामिन् भवत आदेशः प्रमाणं. अथ रूपसेनकुमारेण राजानंप्रति विज्ञप्तं, हे राजन् अथैतासां वेश्यानामेषां चारक्षकाणामभयदानं दीयतां? ततो राज्ञा मुक्तास्ते सर्वेऽपि प्रमुदिता नृपं नमस्कृत्य स्वस्वस्थानके गताः, नगरमध्येऽपि सर्वेषां हर्षः समुत्पन्नः, पौराश्च परस्परं कथयामासुः, यदेतत्सर्वं समीचीनं जातं यद्राज्ञश्चतुर्दशशतमनुष्यवधपापं न लग्नं. अथ स रूपसेनकुमारस्तलारक्षेण वधभूमिंप्रति नीयमानः क्रमेण चतुष्पथे समागात्. तत्र केचिद् दृढप्रहारिवत्तस्य निंदां कुर्वंति, केचिच्च तस्योपरि दयां कुर्वंति, केचिच्च वदंति, यथा—दीपे पतंगवज्जाले। मत्स्यवत्कर्दमे करो ॥ पाशे मृगस्तस्था चैष । संकटे पतितः कथं ॥ ६६ ॥ अपरे चैवं वदंति—कर्मणा प्रेरितो गच्छेत् । स्वर्गं वा श्वभ्रमेव च ॥ यतो जंतुरनीशोऽय–मात्मनः सुखदुःखयोः ॥ ६७ ॥ कुमारस्तु पंचपरमेष्ठिध्यानपरोऽग्रे चलितः. अथैवं

॥ ४३ ॥

तलारक्षस्तं सर्वत्र भ्रामयित्वा संध्यासमये शूलायामारोपयामास. ततः स तलारक्षो राज्ञः पार्श्वे समागत्य कथयामास, हे राजन् मया भवदादेशः कृतोऽस्ति. अथ सा कुमारशूलारोपणवार्ता तया मालिन्या ज्ञाता, तदा सा स्वमनस्यत्यंतं खेदं कर्तुं लग्ना, हा दैव स सत्पुरुषो राज्ञा मारितः, इति विविधं खेदं कुर्वंती सा तस्य गुणान् मुहुर्मुहुः सस्मार, यतः—कोकिला सहकारस्य । गुणं स्मरति नित्यशः ॥ कमलस्य गुणं भृंगो । राजहंसश्च मानसं ॥ ६८ ॥

अथ तया स्वभर्त्रे मालिकाय ज्ञापितं, हे स्वामिन्ननेन कुमारेण धनार्पणादस्माकमुपरि भूरिरुपकारः कृतोऽस्ति, अथास्मिन्नवसरे वयमपि तस्योपरि चेत्प्रत्युपकारं कुर्महे तदैव योग्यं कथ्यते. यतः—दो पुरिसे धरउ धरा । अहवा दोहिं हि धारिआ पुहवो ॥ उवयारे जस्स मणो । उवकरिअं जो न विस्सरइ ॥ ६९ ॥ अत्र बहवोऽपि धनवंतः संति, परमुदारा न संति, अनेन कुमारेण तु स्वौदार्यगुणेनास्माकमुपरि बहुरुपकारः कृतोऽस्ति. तेन हे स्वामिन् त्वं तत्रेमं दंडं लात्वा गच्छ? एनं परोपकारिणं कुमारं च जीवापय? रात्रिसमयो जातोऽस्ति, तेन तत्र गत्वा वारत्रयं स्वमनेन दंडेन तस्य शरीरं शनैः शनैस्ताडय? यथा स सजीवो भूत्वा सुखी स्यात्. तथा चोक्तं पद्मपुराणेऽपि—परोपकारः कर्तव्यः । प्राणैरपि धनैरपि ॥

परोपकारजं पुण्यं । न स्याद्यज्ञशतैरपि ॥ ७१ ॥ परोपकरणं येषां । जागर्ति हृदये सतां ॥ नश्यंति विपदस्तेषां। संपदः स्युः पदे पदे ॥ ७२ ॥ तदा मालिकेनोक्तं हे प्रिये त्वया सत्यं कथितं, परं त्वं मुग्धासि, स्त्रीणां बुद्धिः पार्ष्णिस्थिता भवति. चेदहं तत्र गत्वा तथा करोमि, राजा चैतच्चरमुखाज्जानाति तदाहमपि तत्र तथैव द्वितीयो भवामि, तेन च राजविरुद्धमहं सर्वथा न करिष्ये. तत् श्रुत्वा मालिनी प्राह, हे प्राणेश अधुना तु परोपकारकरणावसरोऽस्ति, अस्य जीवितदानोपकारपुण्यं च महाफलाय भविष्यति, यतः—तीर्थस्नानैर्न सा शुद्धि-र्बहुदानैर्न तत्फलं ॥ तपोभिरुग्रैस्तन्नाप्य-मुपकाराद्यदाप्यते ॥ ७५ ॥ तेन हे स्वामिंस्त्वं साहसं कृत्वा तत्र गच्छ? नूनं तव कार्यसिद्धिर्भविष्यति. एवं तया बहुभिः प्रकारैः कथितेऽपि तेनोक्तमहं तु सर्वथा तत्र नैव यास्यामि, यतो ममापि जीवनेच्छा वर्तते. एवं तन्निश्चयं ज्ञात्वा कृतज्ञा सा मालिन्युवाच हे स्वामिन् त्वं तर्हि गृहे तिष्ट? अहमेव तत्र यास्यामीत्युक्त्वा सा दंडं गृहीत्वा तत्र गता.

अथ शूलोपरिस्थः स कुमारस्तया बोधितोऽपि न वदतिस्म, तृषया शुष्कतालुकेठोष्ठो मूर्छित इव तया स ज्ञातः. ततस्तयैकवारं दंडेन ताडितोऽसौ जृंभां कृतवान्. पुनस्तयेतस्ततोऽवलोक्य द्वितीयवारं

ताडितेन तेन नयने समुद्घाटय तस्याः सन्मुखं विलोकितं. तदा हृष्टा मालिनी तं तृतीयवारं दंडेन ताडयामास, तत्क्षणं स सावधानो भूत्वा मालिन्यै योत्कारं कृतवान्. तयापि तस्याशीर्वादो दत्तः, कथितं च हे बांधव तव कियद्दुःखं समुत्पन्नं? कुमारः प्राह हे भगिनि मम तु निद्रागताभूत्, तेन मया किमपि दुःखं न ज्ञातमस्ति. त्वयायं ममोपरि महानुपकारः कृतोऽस्ति. ततस्तौ मालिनीकुमारौ कुशलेन स्वगृहे समागतौ. अथ मालिनी कुमारंप्रति जगाद, हे भ्रातरथ त्वया विषादो नैव कार्यः, यतः—मानपातोऽपि तस्य स्या—द्यस्य मानोन्नतिः क्षितौ ॥ प्रणतिः पादयोरेव । निगडोऽपि पुनस्तयोः ॥ ७८ ॥ अथ मालिकोऽपि तं जीवंतमागतं दृष्ट्वा हृष्टः सन् चिंतयामास, नूनं मत्स्त्रीकृत उद्यमोऽपि सफलो जातः. ततोऽसौ रूपसेनंप्रति जगाद, हे कुमार! तवापि महद्भाग्यं यत्त्वं कष्टाच्त्रुटितः. कुमारः प्राह युष्मत्प्रसादात्. ये भवादृशाः संकटे जनोपर्युपकारं कुर्वंति तैरेव जनैरियं पृथ्व्यलंकृतास्ति. उक्तं च—विहलं जे अवलंबइ। आवइपडियंवि जो समुद्धरइ ॥ सरणागयं च रक्खइ। तेहिं हि अलंकिया पुहवी ॥ ७९ ॥ निर्गुणेष्वपि सत्वेषु । दयां कुर्वंति साधवः ॥ न हि संहरते ज्योत्स्नां । चंद्रश्चांडालवेश्मसु ॥ ८० ॥ मालिकेनोक्तं भो कुमार! सर्वोऽप्ययं तव धर्ममहिमा फलितोऽस्ति. एवं विविधवार्ता विधाय सुखसुप्तानां तेषां रात्रिर्व्य-

तिक्रांता, प्रातःकालश्च संजातः. ततः कुमारेण मालिनींप्रति प्रोक्तं, हे भगिनि! अद्य त्वं पुष्पप्राभृतं गृहीत्वा कुमार्या आवासे गच्छ? तत्र गत्वा च त्वया कुमार्या हर्षविषादपरीक्षा कर्तव्या. सा यदि ममोपरि हर्षं वहंती सती ममेदृशं दुःखं ज्ञात्वा दुःखिनी स्यात्तदा त्वया मह्यं कथनीयं, चेत्सा मद्विषये उद्वेगं कुर्वंती स्यात्तदा सायं तत्र गत्वा तस्या अहं हर्षमुत्पादयिष्यामि. चेन्मद्विषये तस्या मनसि मनागपि विषादो न स्यात्तदा तस्या गृहे गमनेन किं प्रयोजनं? यतो निःस्नेहे प्रीतिकरणतः को रसः? यतः—

पानीयस्य रसः शैत्यं । भोजनस्यादरो रसः ॥ आनुकूल्यं रसः स्त्रीणां । श्रियो दानं रसः परः ॥ ८१ ॥

अथ कुमारेणेत्युक्ता मालिनी पुष्पकंचुकं ग्रथयित्वा तदावासे प्राप्ता. अथ पुष्पकंचुकयुतां मालिनीमागतां विलोक्य सा कनकवती राजकुमारी जगाद, हे सखि अद्य त्वं प्राभृतं लात्वा कुतः समागतासि? अद्य नायं प्राभृतग्रहणावसरः, यतोऽद्य मम प्राणप्रियपतिवियोगो जातोऽस्ति, तेन च मे मनसि सांप्रतं भृशं दुःखं वर्तते. कस्याग्रे चैतन्मम दुःखस्वरूपं कथयामि? त्वमेवैका मम जीवनतुल्या सखी वर्तसे, तेन तवाग्रेऽहमेतत्सत्यं कथयामि, यत्पतिविरहो मे विषतुल्य एवाधुना जातोऽस्ति, अथाहं सर्वथा नैव जीविष्यामि, अद्य समस्तायामपि निशायां मम निद्रा नागतास्ति, नूनमथाहं विषभक्षणरज्जुपाशादिना मरणं

साधयिष्मामि. अद्य तु दैवं ममोपर्यैव रुष्टमस्ति, येन मम प्राणनाथरूपं सर्वस्वं संहृतं. अथ प्राणनाथं-विना मम क्षणमपि रतिर्नास्ति, अहं तु तं क्षणमपि नैव विस्मरामि. अथ हे सखि त्वया ममापराधः क्षंतव्यः, अद्य रात्रावहं प्राणत्यागं करिष्यामि. इत्यादि कथयित्वा सा पवनंप्रति जगाद्—पवन सुणे एक वातडी । हवे होइस हुं छार ॥ तिणदोसे उडाडजे । जिण दिसि होय भरथार ॥ ८३ ॥ इत्यादि प्रलप्य सा स्वपतिस्नेहेन बाढं विलपितुं लग्ना, यतः—स्नेहमूलानि दुःखानि । रसमूलाश्च व्याधयः ॥ लोभ-मूलानि पापानि । त्रीणि त्यक्त्वा सुखी भव ॥ ८७ ॥ इत्यादि श्रुत्वा सा मालिनी तां कनकवतीं कुम-रणाद्वारयामास, हे सखि यदि त्वं मदुक्तं करिष्यसि तदाहं ते कथयामि, यत्त्वया मरणं न चिंत्यं यतो जीवन्नरो भद्रशतानि पश्यति, नृपपरीक्षितस्नेहगंगापतिमंत्रीश्वरवत्, तद्यथा—कस्यचिन्नृपस्यैको मंत्री-श्वर आसीत्, तस्य मंत्रीश्वरस्य गंगाभिधाना पत्नी बभूव. तयोर्दंपत्योरन्योन्यं महान् स्नेहो बभूव. तयोस्तत्स्वरूपं केनापि राज्ञोऽग्रे निवेदितं. एकदा तत्परीक्षाकरणकौतुकिना राज्ञा स मंत्रीश्वरः कटके स्वसार्धं गृहीतः. अथ मंत्री प्रयाणे प्रयाणे स्वप्रियायै गंगायै स्नेहलेखान् प्रेषयामास. अथैकदा राज्ञा तत्स्नेहपरीक्षार्थं स्वसेवकसार्थे गंगायै लेखः प्रेषितः; गंगया च स लेखो वाचितः, तन्मध्ये लिखितमासी-

॥ ४८॥

द्यन्मंत्रीश्वरो मृत इति. तद्वाचयंत्यैव तया स्नेहवशात्स्वप्राणास्त्यक्ताः. अथ तेन सेवकेन पश्चादागत्य गंगायास्तत्स्वरूपं राज्ञे निवेदितं. ततो राज्ञा मंत्रीश्वरस्योत्तारके गत्वा तस्या मरणं ज्ञापितं. तत् श्रुत्वैव मंत्रीश्वरोऽपि मूर्छितः, शीतोपचारैर्लब्धसंज्ञः स आत्मघाताय तत्परो बभूव. परं पश्चात्तापपरेण राज्ञा तत् सर्वं स्वरूपं निवेद्य क्षामयित्वा च बहुकथनपूर्वकं स मरणाद्रक्षितः. ततो द्वादशवर्षानंतरं स मंत्रीश्वरः स्वपत्न्यस्थीनि गृहीत्वा गंगायां क्षेपणार्थं गतः. ततः स स्नात्वा तान्यस्थीनि यावत्तन्नाम्ना गंगायां प्रक्षिपति तावत्तत्र वाणारसीनृपतिपुत्री सखीयुता स्नानार्थमागता. तस्याश्च पूर्वभवसंबंधिस्वनामादि श्रुत्वा तत्क्षणं जातिस्मरणज्ञानं समुत्पन्नं, तत्कालं सा मूर्छामासाद्य भूमौ पतिता. तदा व्याकुलाभिः सखीभिस्तद्वृत्तांतो राज्ञे ज्ञापितः, राजापि तूर्णं तत्र समागतः. तदा सखीभिरुक्तं हे स्वामिन्ननेन वैदेशिकेन किमपि मंत्रादिकं भणितं, तेन चासौ कुमारी भूमौ पतिता. इतः शीतोपचारैः सचेतनीभूता कुमारी जगौ, हे तात अस्य वैदेशिकस्य यदि यूयं किमपि विरूपं करिष्यथ तदाहं प्राणत्यागं करिष्ये. तत् श्रुत्वा विस्मितेन राज्ञा पृष्टा सा कुमारी सर्वं निजपूर्वभववृत्तांतं जगौ. असावेव मंत्रीश्वरो मम पूर्वभवभर्तास्ति, तेनानेनैव सार्धं मम पाणिग्रहणं कारय? अन्यथाहं काष्टभक्षणं करिष्ये. राजापि तत् श्रुत्वा भूरिसन्मा-

नपूर्वकं तं मंत्रीश्वरं स्वगृहे समानीय तया स्वपुत्र्या सह तस्य पाणिग्रहणं कारयामास. एवं जीवतो मंत्रिणः सैव भार्या प्राप्ता. तथा त्वमपि मरणं मा चिंतय? यतः—विपद्यपि गताः संतः । पापकर्म न कुर्वते ॥ हंसः कुर्कुटवत्कोटा–नत्ति किं क्षुधितोऽपि हि ॥ ७ ॥ एवंविधानि मालिन्या वचनानि श्रुत्वा तया राजकन्ययोक्तं, हे सखि! प्राणनाथेन विनोत्तमस्त्रीणामवस्थानं न युक्तं, पतिरहिता हि स्त्रियः स्थाने स्थाने पराभवं प्राप्नुवंति. उक्तं च—विवाहे पुण्यकार्यादौ । मंगलं सधवाः स्त्रियः ॥ विधवा गर्हिता लोके । प्राप्नुवंति पराभवं ॥ ९० ॥ अथ मालिन्योक्तं हे सखि त्वं विषादं मा कुरु? तव भर्ता कुशलेन वर्तते. तत् श्रुत्वा सा प्राह, हे सखि! स मम पतिर्यदि जीव्यते तर्हि जगति कोऽपि न मृत्युं प्राप्नुयात्. ततो मालिन्या तद्विषयेऽनेके सपथाः कृताः, उक्तं च हे सखि त्वमद्य संध्यावधि विलंबस्व? चेदद्य स प्राक्तनवेलायां तव पार्श्वे न समागच्छेत्तदा त्वया मरणं चिंत्यं, नूनं मदुक्तमन्यथा नैव भविष्यति. इत्युक्त्वा मालिनी तस्यै तत्पुष्पकंचुकं समर्प्य स्वगृहे समागता. ततस्तया कुमाराय तस्याः सर्वोऽपि वृत्तांतः कथितः, पुनरुक्तं च मया साद्य संध्यावधि मरणाद्रक्षितास्ति. तत् श्रुत्वा कुमारो हृष्टः सन् वर्ष-समानं तद्दिनं कथमप्यतिवाह्य रात्रौ पादुके परिधाय तस्या आवासे प्राप्तः. ततस्तं कुमारं समागतं दृष्ट्वा

मेघवृष्टिं विलोक्य मयूरीव सातीवप्रमोदं प्राप्ता. यतः—अमृतं शिशिरे वह्नि—रमृतं क्षीरभोजनं ॥ अमृतं राजसन्मान—ममृतं प्रियदर्शनं ॥ ९१ ॥ ततः कुमारेणोक्तं हे प्रियेऽथात्रावस्थानं न युक्तमिति कथयित्वा स रूपसेनकुमारो मालिनीगृहात्स्ववस्तुग्रंथिं समादाय तामकथयित्वैव प्रियायुतः पादुकाप्रयोगेण तत्रैव वटवृक्षे समागतः, तत्र वटशाखायां च ताभ्यां रात्रौ विश्रामो गृहीतः. तदा कनकवती सुप्ता, कुमारश्च जागरुकोऽस्थात्. यतः—उद्यमे नास्ति दारिद्र्यं । जपने नास्ति पातकं ॥ मौनेन कलहो नास्ति । नास्ति जागरतो भयं ॥९२॥ निर्धना धनवंतश्च । नृपास्तदधिकारिणः॥ प्रवासिनश्च वेश्याश्च । न स्वपंति कदाचन ॥ ९३ ॥ अथैतस्मिन्नवसरे तत्रैको योगी एका योगिनी च, तौ दंपती क्वापि गच्छंतौ रात्रौ विश्रामार्थं समागत्य तस्यैव वटवृक्षस्यैकायां शाखायां स्थितौ. इतः स योगी तत्स्थानं दृष्ट्वा बाढं रुदितुं लग्नः, योगिन्या वारितोऽपि स रुदनतो न तिष्ठति. तदा योगिन्या पृष्टं हे स्वामिन् त्वमस्यां वेलायामेतस्मिन् रौद्रे स्थानके कस्माद्रुदनं करोषि? तेनोक्तं हे प्रिये त्वमेतद्वृत्तांतं शृणु? अस्मिन्नेव वटवृक्षे वयं चत्वारो योगिनः समसुखदुःखाश्चतुःशतवर्षाणि यावत् स्थिताः. ध्यानतुष्टदेवतार्पितकंथादिवस्तुचतुष्टयप्रसादान्महासुखं चान्वभवाम. परमेकदा कोऽपि धूर्तोऽत्र समागत्यास्मान् वंचयित्वा महाप्रभावयुतं तद्वस्तु-

चतुष्टयं च गृहीत्वा पलायितः, अस्मिन् स्थाने चेत्यादिस्मरणतो मम रुदनं समागतं. अतो हे प्रिये जगति कस्यापि विश्वासकरणं न युक्तं, यतः—न विश्वसेदमित्रस्य । मित्रस्यापि न विश्वसेत् ॥ कदाचित्कुपितं मित्रं । सर्वं गुह्यं प्रकाशयेत् ॥ ९४ ॥ तेन धनाधिगमनादहं रोदिमि. तत् श्रुत्वा योगिन्योक्तमथारण्यरुदितेन किं स्यात्! यतः—भवितव्यं भवत्येव । कर्मणामीदृशी गतिः ॥ विपत्तौ किं विषादेन । संपत्तौ हर्षणेन किं ॥ ९५ ॥ किंच तद्वस्तुभ्योऽपि कस्याप्युपकार एव भविष्यति, लक्ष्म्याः फलमप्येतदेव, नो चेद्विनाशः स्यात्, उक्तं च—दानं भोगो नाश—स्तिस्रो गतयो भवंति वित्तस्य ॥ यो न ददाति न भुंक्ते । तस्य तृतीया गतिर्भवति ॥ ९६ ॥ धनं नश्यति पुत्रोऽपि । विपद्य क्वापि गच्छति ॥ न हि शक्या गतिर्ज्ञातुं । धनस्य निधनस्य च ॥ ९७ ॥ वनकुसुमं कृपणश्रीः । कूपच्छाया सुरंगधूलिश्च ॥ तत्रैव यांति विलयं । मनोरथा भाग्यहीनानां ॥ ९८ ॥ कीटिकासंचितं धान्यं । मक्षिकासंचितं मधु ॥ कृपणैः संचिता लक्ष्मी—रन्यैस्तु परिभुज्यते ॥ ९९ ॥ तेन हे स्वामिंस्त्वया दुःखं न करणीयं. पुनस्तया योगी पृष्टः, हे स्वामिन्नियंति वर्षाणि यदि यूयमत्र स्थितास्तदात्र कापि मूलिका जटिका वा भवद्भिराश्चर्यकारिणी दृष्टा न वा? तदा योगी प्राह अस्मिन् प्रदेशे चैक एवंविधो वृक्षोऽस्ति यस्याघ्रातया मूलि-

कया मनुष्यो मर्कटो भवेत्. तत् श्रुत्वा सा प्राह हे स्वामिन् यया मनुष्योऽपि पशुत्वं प्राप्नुयात्तया मूलिकया किं प्रयोजनं? पुनर्योगी प्राह हे प्रिये द्वितीयाप्यत्रैकैवंविधा मूलिकास्ति यया चाघ्रातया मर्कटोऽपि मनुष्यः स्यात्. ततो योगिन्या प्रेरितो योगी तन्मूलिकाद्वयं गृहीत्वा स्वपत्नीयुतोऽन्यत्र ययौ. अथायं सर्वोऽपि वृत्तांतो जागरुकेण रूपसेनकुमारेण श्रुतो दृष्टश्च. ततो विस्मितेन कुमारेणापि तन्मूलिकाद्वयं गृहीतं. अथ कनकवती जागृता कुमारश्च सुप्तः, क्षणेन तस्य निद्रापि समागता. ततः कनकवत्या चिंततमेतद्ग्रंथिं विलोकयामीति. ततो यावत्तां ग्रंथिं छोटयित्वा सा विलोकयति तावत्तया तन्मध्ये कंथापात्रदंडादि दृष्टं. तद् दृष्ट्वा चमत्कृता सा चिंतयामास नूनमयं कोऽपि धूर्तो योगी दृश्यते, वेषपरावर्तनेन धूर्तविद्ययाडंबरेण चाहं मुग्धानेनेयत्कालं विप्रतारितास्मि. यतः—प्रथमं डंबरं दृष्ट्वा । न प्रतीयाद्विचक्षणः ॥ अत्यल्पपठितं कीरं । तेनेव कुट्टिनी यथा ॥ २०० ॥ तथाहि—सिंदूरपुरे मदनकाभिधो धूर्त एको विप्र आसीत्. तेनैकः शुकः पाठयितुमारेभे, परं तस्य शुकस्य तु किमपि नायाति. ततस्तेन शठेन 'वीसेवीसा' इत्येकमेव पदं स पाठितः. ततस्तं सुंदरपंजरमध्ये संस्थाप्य चतुष्पथे तद्विक्रयार्थं स्थितः. इत एका वेश्या तत्र समायाता, तया विप्रंप्रति पृष्टं भो विप्र अयं शुकः किं वेत्ति? विप्रः प्राह

अयं तु सर्वमपि वेत्ति, त्वं स्वयमेव पृच्छ? ततस्तया शुकंप्रति पृष्टं भो शुक! त्वं मातृकां पठितुं वेत्सि? शुकेनोक्तं 'वीसे वीसा' ततस्तया हृष्टया स शुको ब्राह्मणंप्रति बहुद्रव्यं दत्वा गृहीतः. गृहे समागत्य पृष्टः स शुकस्तु तदेव पदमाह. ततस्तया ज्ञातमहो धूर्तेन तेन विप्रेणाहं बाढं वंचिता. एवमहमप्यनेन धूर्तेनेयत्कालं विप्रतारिता. अरेरे राजकुमार्या ममानेन योगिना सह संयोगो जातः. अहो कर्मणां गतिर्विचित्रास्ति. यतः—अघटितघटितानि घटयति। सुघटितघटितानि जर्जरीकुरुते ॥ विधिरेव तानि घटयति । यानि पुमान्नैव चिंतयति ॥ १ ॥ हैहै दैवेन दुर्घटं घटितं, अहो नीचजातीयजनसंगान्मरणमेव श्रेयस्करं.

अथ त्वहं यदि पश्चाद्यामि तदैव वरं, इति विचिंत्य सा तद्वस्तुचतुष्टयं गृहीत्वा पादुकाप्रयोगेण शीघ्रं स्वनगरे स्वावासे प्राप्ता, केनापि च तद्गमनागमनं न ज्ञातं. अहो निर्बुद्धिकत्वेन दृढस्नेहाभावेन च सा मूर्खा तं चिंतामणितुल्यमपि त्यक्त्वा गता. यतः—अनृतं साहसं माया। मूर्खत्वमतिलोभता ॥ अशौचं निर्दयत्वं च । स्त्रीणां दोषाः स्वभावजाः ॥ २ ॥ स्त्रीणां हि प्रायोऽविमृश्यकारित्वमेव स्यात्. इतोऽत्र कुमारो जागरितः स्वप्रियामालापयति, परं कोऽप्युत्तरं न ददाति. तदा तेनांधकारे ज्ञातं यत्तस्या

निद्रा समागता भविष्यति. ततस्तां स जागरयति—प्रोज्जृंभते परिमलः कमलावलीनां । शब्दं करोति च तरूपरि ताम्रचूडः ॥ श्रृंगं पवित्रयति मेरुगिरेर्विवस्वा–नुत्थीयतां सुनयने रजनी जगाम ॥४॥ तथापि सा न वदति. पुनः क्षणं प्रतीक्ष्य स स्वप्रियामुद्दिश्य बभाषे–एते व्रजंति हरिणास्तृणभक्षणाय । चूर्णं विधातुमथ यांति हि पक्षिणोऽपि ॥ मार्गस्तथा पथिकलोकगणप्रपूर्णं । उत्थीयतां सुनयने रजनी जगाम ॥ ५ ॥ इत्युक्तेऽपि किंचिदप्युत्तरमलब्ध्वा विस्मितो रूपसेनकुमारो यावत् सावधानतया विलोकयति तावत्तत्र स्वभार्यां न पश्यतिस्म, कंथादिवस्तुचतुष्टयमपि न विलोकयतिस्म. अहो मम निद्रामध्ये इदं किं जातं! यतः—निद्रा मूलमनर्थानां । निद्रा श्रेयोविघातिनी ॥ निद्रा प्रमादजननी । निद्रा संसारवर्धनी ॥ ६ ॥ नूनं मनुष्याणां निद्रया हानिरेव स्यात्, उक्तं च–आजन्मोपार्जितं द्रव्यं । निद्रया व्यवहारिणां ॥ चौरैस्तु गृह्यते सर्वं । तस्मादेतां विवर्जयेत् ॥ ८ ॥ ततोऽसावुत्थाय तां सर्वत्र विलोकयामास, परं सा न लब्धा. ततः स मनसि चिंतयति, अहो नूनं सा मातृपितृमिलनमनोरथा पुनः स्वस्थानके एव गता संभाव्यते, परं सा मम दिव्यवस्तुग्रंथिमप्यादाय यद्गता तदेवैतत्कार्यं मम दुःखं करोति. यतः—रात्रिर्गमिष्यति भविष्यति सुप्रभातं । भास्वानुदेष्यति हसिष्यति पंकजं च ॥ इत्थं विचिंतयति कोश-

गते द्विरेफे । हा हंत हंत नलिनीं गज उज्जहार ॥ १० ॥ ततः कुमारेण चिंतितं नूनं सापि मालिनीव मम योगिस्वरूपं ज्ञात्वा भीता सती पश्चात्स्वगृहे गता संभाव्यते, मूर्खत्वेनौत्सुक्यत्वेन च तथैव कृतं ज्ञायते. यतः—मूर्खस्य पापस्य न किंचिदंतरं । बालस्य वृद्धस्य न किंचिदंतरं ॥ विषस्य तैलस्य न किंचिदंतरं । मृतामृतास्यापि न किंचिदंतरं ॥ १२ ॥ अहो स्त्रीणां ये विश्वासं कुर्वंति ते मूर्खा एव, यतः—नदीनारीनरेंद्राणां । नीचनागिनीयोगिनां ॥ नखिनां च न विश्वासः । कर्तव्यः सुमनस्विना ॥ १३ ॥ ततः कुमारो मर्कटमनुष्यभवनमूलिकाद्वयं गृहीत्वा, एकया मूलिकाया च स्वयं मर्कटीभूय कियद्भिर्दिनैः स कनकपुरे तस्यामेव वाटिकायां गतः, ततोऽसौ द्वितीयां मूलिकामाघ्राय यथास्थितस्वरूपो जातः सन् चंपकवृक्षतले सुप्तः. इतः सा मालिन्यपि पुष्पग्रहणार्थं तत्र समायाता, कुमारं च दृष्ट्वा हृष्टा सत्युवाच, भो भ्रातस्त्वमियंति दिनानि क्व गतोऽभूः? केन कारणेन, कस्मै लाभाय, कस्य मिलनार्थं वा गत आसीः? तत् श्रुत्वा रूपसेनकुमारेणोक्तं हे भगिनि त्वं शृणु? इत्युक्त्वा कुमारेण सकलमपि कनकवत्याः स्वरूपं तस्या अग्रे निवेदितं. तदा विस्मितया तया पृष्टं, हे भ्रातः सा कनकवती त्वत्रैव स्थितास्ति, अहं तु सर्वदा तस्याः पार्श्वे गच्छामि. तेनोक्तं तस्यां रात्रौ सा मया सार्धं समागताभूत्, परं मयि

निद्राणे सा मम सर्वस्वं लात्वात्रागतास्ति, एवं च तया मया सार्धं विश्वासघातः कृतोऽस्ति, ततोऽथ तस्यास्तद्विश्वासघातफलदर्शनार्थं ममाभिलाषो वर्तते. तत् श्रुत्वा मालिन्योक्तं हे भ्रातरबलोपरि कः कोपः? कीटिकोपरि कः कटकाटोपः? कुमारेणोक्तमथैकवारं तस्याः समीपे गंतुं ममेच्छा वर्तते, मालिन्योक्तं तत्र तु सप्तशतमिता आरक्षकाः संति, ततो विना पादुके तत्र गमनमशक्यमेव. कुमारेणोक्तं हे भगिनि तत्र गमने मम पार्श्वे एका बुद्धिर्वर्तते, ततो यदि त्वं मे कथितं करोषि तदा तां बुद्धिमहं कथयामि. तद्वृत्तांतस्तु त्वया कस्याप्यग्रे न कथनीयः, यन्मम स्त्रीणां विश्वासो नास्ति, स्त्रीणां हृदये गांभीर्यं न स्यात्, यतः—अवसेत्ववटे नोरं। चालिन्यां सूक्ष्मपिष्टकं ॥ स्त्रीणां च हृदये वार्ता। न तिष्टंति कदाचन ॥ १४ ॥ तेनैव हेतुना त्वामहं दृढं कथयन्नस्मि. मालिन्योक्तं हे बांधव त्वमेवं पुनः पुनः कस्माद्वदसि? सर्वा अपि स्त्रियस्तुल्या न स्युः, अतस्त्वं मे निःशंकं कथय? तदा कुमारः प्राह हे भगिनि शृणु? अहं केनाप्युपायेन मर्कटो भविष्यामि, ततश्च त्वया मर्कटरूपं मामादायैकदा राजकुमार्या आवासे गंतव्यं. ततो यदा सा कुमारी मर्कटरूपं मां क्रीडार्थं मार्गयेत् तदा त्वया सहसाहं नार्पणीयः, परं यद्यत्याग्रहं कुर्यात्तदा त्वयाहमर्पणीयः, यथेच्छं मूल्यद्रव्यं च गृहणीयं, एवं च कृते तवापि लाभो

ममापि च कार्यसिद्धिर्भविष्यति. तत् श्रुत्वा तयोक्तं हे भ्रातस्त्वदुक्तं मम प्रमाणमेव, अहमपि तथैव करिष्यामि. ततः कुमारो मर्कटरूपो जातः, तं मर्कटं कपर्दिकाघुर्घरिकावस्त्रादिभिरलंकृत्य तेन सह कनकवत्याः प्रासादे गता. तत्र पुष्पादिप्राभृतं विधाय प्रणामं कुर्वंती सा मालिनी कुमार्या पृष्टा, हे सखि एष मर्कटस्तु सुंदरो दृश्यमानोऽस्ति, तद्येनं क्रीडाविनोदार्थं मह्यं समर्पय? तत् श्रुत्वा मालिनी प्राह, हे स्वामिनी सर्वमपि त्वदायत्तमेवास्ति, परमयं मर्कटस्तु मम वाटिकाया रक्षकोऽस्ति, मम भर्तुरपि स प्राणप्रियोऽस्ति, मे बालका अपि चैतेन सह क्रीडां कुर्वंति, तेन स तुभ्यं कथमर्पयितुं शक्यते? तदा कुमारी प्राह त्वं किमपि द्रव्यं गृहाण? परं ममैनं मर्कटमर्पय? येन मे दिनानि सुखेन यांति. ततः कुमार्या तस्यै मालिन्यै एको दीनार एका च वर्या शाटिका दत्ता, एवमतीवाग्रहतो मालिन्यापि तस्यै मर्कटो दत्तः. ततो मालिनी स्वमंदिरे गता, कुमारी च सकलं दिनं यावत्तेन मर्कटेन सह क्रीडाविनोदं चकार. अथ संध्यासमये यदा सर्वो दास्यादिपरिवारः स्वस्वस्थानके प्राप्तस्तदा स मर्कटो मूलिकामाघ्राय यथावस्थितरूपो रूपसेनकुमारो जातः; तं दृष्ट्वा चकितया कुमार्या चिंतितमहो किमिदमाश्चर्यं! किमेंद्रजालं! किं वा कोऽपि स्वप्नभ्रमः! ततः सा लज्जया स्ववस्त्रांगसंवरणं विधाय देवमिवागतं स्वपतिं ज्ञात्वा

तत्पादयोः पतिता, कथयामास च हे स्वामिन्ममापराधं त्वं क्षमस्व? हे प्राणनाथ त्वमेव मम जीवनं गतिश्च. अज्ञानान्मया कृतोऽन्यायस्त्वया मनसि नानेयः, एकवारं च क्षंतव्यः, अथ पुनरहमेवं नैव करिष्यामि. तत् श्रुत्वा कुमारः प्राह, हे प्रिये बहुकथनेनाथ किं स्यात्? कृत्रिमस्नेहेन मनागपि कार्यसिद्धिर्न भवति, सत्यस्नेहरंगस्तु दुर्लभः. यतः—प्राप्तुं पारमपारस्य। पारावारस्य पार्यते ॥ स्त्रीणां प्रकृतिवक्राणां। दुश्चरित्रस्य नो पुनः ॥१९॥ कुमित्रे नास्ति विश्वासः। कुभार्यातः कुतः सुखं ॥ कुराज्ये निर्वृतिर्नास्ति। कुदेशे नास्ति जीवितं ॥ २० ॥ तत् श्रुत्वा राजकुमारी प्राह हे स्वामिन् युष्मादृशाः सत्पुरुषाः कृतापराधेऽपि जने न कुप्यंति, नूनं मया युष्माकं संतापः कृतोऽस्ति, तेनाहमग्नितुल्या जातास्मि, यूयं च चंदनसमाः स्थ, यतः—सुजनो न याति विकृतिं। परहितनिरतो विनाशकालेऽपि ॥ छिन्नोऽपि हि चंदनतरुः। सुरभयति मुखं कुठारस्य ॥ २३ ॥ अथाहं हे स्वामिन् युष्मत्पादयोर्मुहुर्मुहुः प्रणिपत्य कथयामि, यन्ममापराधः क्षंतव्यः. इत्यादीनि कुमारीवचनानि श्रुत्वा रूपसेनकुमारेणोक्तं, हे प्रिये अस्मिन् विषये तव कश्चिदप्यपराधो नास्ति, मम प्राक्तनकर्मण एवायं दोषोऽस्ति, यतः—उदयति यदि भानुः पश्चिमायां दिशायां। विकसति यदि पद्मं पर्वताग्रे शिलायां ॥ प्रचलति यदि मेरुः शीततां

याति वह्नि–स्तदपि न चलतीयं भाविनी कर्मरेखा ॥ २५ ॥ अथ हे प्रिये यदि त्वं मदाज्ञावर्तिन्यसि तदा त्वमेनामौषधीं गृहाण? आघ्राय च विलोकय यत्कीदृशोऽस्याः परिमलोऽस्तीति. अनयाघ्रातया च यावज्जीवमावयोः स्नेहो भविष्यति. तत् श्रुत्वा तया मुग्धया च तथैव कृतं. तत्क्षणमेव सा मर्कटीरूपा जाता, ततो रूपसेनकुमारो मर्कटीरूपां तां स्तंभे बध्ध्वा तद्गृहमध्यस्थापिततद्वस्तुचतुष्टयं च लात्वा पादुकाप्रयोगेण द्रुतं मालिन्या गृहे गतः. प्रातश्च स्वकीयं सर्ववस्तुसमूहं गृहीत्वा स वने प्रयातः, तत्र च गत्वा स स्वमनसि सम्यग् विचिंत्य योगींद्ररूपं विधाय कंथादि च परिधायावधूतवेषेण स्थितः. यतः—क्वचिद्भूमौ शय्या क्वचिदपि च पर्यंकशयनं। क्वचिच्छाकाहारः क्वचिदपि च शाल्योदनरुचिः ॥ क्वचित्कंथाधारी क्वचिदपि च दिव्यांबरधरो। मनस्वी कार्यार्थी न गणयति दुःखं न च सुखं ॥२०॥ अथ प्रातः कुमार्याः प्रासादे यदा दास्यः समागतास्तदा कनकवतीस्थाने बद्धां तां मर्कटीं विलोकयंतिस्म. ताभिश्च तत्स्वरूपं नृपाय ज्ञापितं, हे स्वामिंस्तव पुत्री मर्कटीरूपा जातास्ति. राज्ञापि तत्रागत्य तद्विलोकितं, तदा तस्य मनसि खेदः समुत्पन्नः, ततोऽसौ विचारयामास किमयं कोऽपि दृष्टिदोषोऽभूत्? किं वा कोऽपि शाकिन्यादिछलो जातोऽस्ति? वा केनापि शप्तास्ति? अथवा केनापि दुष्टेन मंत्रशक्त्या

॥ ६० ॥

मर्कटी कृतास्ति, वा केनापि वैरिणा सुरेण सा मर्कटीत्वं प्रापितास्ति. ततो राज्ञा ताः सर्वा अपि दास्यः पृष्टाः, भो दास्यः कल्ये किं कोऽप्यत्रागत आसीत्? तत् श्रुत्वा दासीभिरुक्तं हे स्वामिन् कल्ये मालिनी समागताभूत्, परं सा तु सर्वदात्र कुमारिकाकृते पुष्पाणि लात्वा समायाति, केवलं कल्ये तया स्वसार्धमेको मर्कटोऽपि समानीतोऽभूत्. तद्विनान्यत्किमपि वयं न जानीमः. ततश्चितातुरो राजा स्वसभायां समागतः, बुद्धिसागरमंत्रीश्वराय च कुमार्यास्तत्स्वरूपं ज्ञापितं, कथितं च मालिन्या किमपि कुटिलं कृतं संभाव्यते. ततो राज्ञा स्वसेवकैराकारिता सा मालिनी भयेन कंपमानांगी राजसभायां समागता. यतः—पंथसमा नत्थि जरा। दरिद्दसमो पराभवो नत्थि ॥ मरणसमं नत्थि भयं। खुहासमा वेअणा नत्थि ॥ २८ ॥ राजाथ मम किं करिष्यति? किमर्थं चाहं तेनाकारितास्मि? इति भृशं चिंतातुरा सा तत्र स्थिता. इतः क्रोधातुरेण राज्ञा सालापिता, अरे दुष्टमालिनि! नगरमध्ये एवंविधानि कूटानि त्वया कुतः क्रियंते? अन्ये जनास्तु तिष्टंतु, मद्गृहे एव त्वया कुटिलं कृतं? भयविह्वलांगी सा प्राह हे राजेंद्र अहं तु किमपि न जानामि. राज्ञोक्तं रे दुष्टे त्वया कल्ये कुमार्यै मर्कटः समर्पित आसीत्, तद्विषये चेमा दास्यः साक्षिण्यः संति. मालिन्यूचे हे स्वामिन् मया स मर्कटस्तस्यै स्वयमेव हट्टान्ना-

र्पितोऽस्ति, परं तया भृशं मार्गितोऽर्पितोऽस्ति. स मर्कटश्च मम वाटिकाया रक्षपालोऽभूत्. एकदा मम वाटिकायां बहवो योगिनः समुत्तरिता आसन्, तैः स मर्कटो मुक्तो विस्मृतो वेति सम्यगहं न जानामि, परं कल्ये मया कौतुकेन स कुमार्या आवासे सार्धमानीतोऽभूत्, त्वत्पुत्र्या च दृष्टो मार्गितश्च. ततः स्नेहेन मयापि तस्यै समर्पितः. तत् श्रुत्वा राजोवाच अरे दुष्टे मत्पुत्री तव पार्श्वान्मर्कटं कस्मात्प्रार्थयेत्? नूनं त्वं मृषाभाषिणी पापिष्टा हृदि च दुष्टा वर्तसे, तव तु चौरदंड एव युक्ताऽस्ति. राज्ञ इति वचनानि श्रुत्वा दुःखार्ता मालिनी चिंतयति, नूनमद्य ममोपरि दैवं रुष्टमस्ति, अकृतोऽपि मम दोषो लग्नः, यतः– जं नयणेहिं न दीसइ । हिअएणवि जं न चिंतिअं कहवि ॥ तं तं सिरंमि निवडइ । नरस्स दिव्वे परा-हूते ॥ २९ ॥ ततो मंत्रीशेन राज्ञ उक्तं हे स्वामिन्नस्याः को नामान्यायः? मुधा पापं कस्मात् क्रियते? पूर्वमेकसर्वजीवरक्षककारुण्यनिधानवैदेशिककुमारमारणरूपं पापं तु भवता कृतमस्ति, अथाधुनेदं स्त्री-हत्यापातकं च मुधा कथं गृह्णासि? अविमृष्टकृतं कार्यं नूनं पश्चात्तापाय जायते. तत् श्रुत्वा राजा प्राह हे मंत्रिन् त्वदुक्तं सत्यमस्ति, परं यदा कुमारी सज्जीभवेत्तदैव मम चित्ते समाधिः स्यात्, अतस्तत्कृते कोऽप्युपायो विलोक्यतां? मंत्री प्राह हे स्वामिन् मालिन्यानया सत्यमेव योगिमुक्तक्रीडामर्कटस्वरूपं

प्रोक्तमस्ति, ततश्च ज्ञायते यदेवंविधकार्यकारिणो योगिन एव संति, ते हि धूर्ता देशांतरेषु भ्रमंति, मंत्रतंत्रादिभिश्च लोकान् विप्रतारयंति, किंच प्रायस्तेऽसत्यवादिन उन्मादिनो मांसादनाश्च भवंति. एषां विश्वासो न कार्यः. तत् श्रुत्वा राज्ञा निजसेवकैर्देशविदेशेभ्यः सहस्रशो योगिनस्तत्राहूताः, समागताश्च ते सर्वे राज्ञा पशव इव वाटके क्षिप्ताः. तत्रस्थास्ते सर्वे चिंतयामासुरहोऽस्माकं नृपः किंप्रकारं गौरवं विधास्यति! अथान्यदा राजा तान् योगिनःप्रति कथयामास, भो योगिनो यूयं देशविदेशभ्रमणशीलाः कौतुकमंत्रतंत्रादिविदः कलाकुशलाः स्थ, अतस्तं कमप्युपायं कुरुत यथा मर्कटीभूता मत्पुत्री सज्जा भवेत्. ते प्रोचुर्हे राजन् वयं तु भिक्षया निर्वाहं कुर्मः, अस्माकं वृश्चिकोत्तारणमंत्रोऽपि नायाति, चेत्कापि कलास्माकमग्रे स्यात्तदा तां कुतो भवतामग्रे न प्रकाशयामः? अथ राज्ञा स्वसेवकाः पृष्टाः, भो सेवकाः किं भवद्भिः सर्वेऽपि योगिनोऽत्रानीताः संति? तैरुक्तं हे स्वामिन्नेकं योगींद्रं विना सर्वेऽपि योगिनोऽत्र समागताः संति. राजा प्राह तर्हि स योगींद्रः क्वास्ति? यो मयाहूतोऽपि नायातः! तैरुक्तं हे स्वामिन् स योगींद्रस्तु कंथां परिधाय चतुष्पथमध्ये ध्यानं कुर्वन् स्थितोऽस्ति, दीनजनेभ्यश्च दीनारान् यच्छति, बहवो जनास्तस्य परित उपविष्टाः संति, तेषामग्रे च स परोपकारविषयमुपदेशं यच्छति, यथा—

स्वहस्तेन च यद्दत्तं । लभ्यते नात्र संशयः ॥ परहस्तेन यद्दत्तं । लभ्यते वा न लभ्यते ॥ ६२ ॥ कस्तूरी पृषतां रदाः करटिनां कृत्तिः पशूनां पयो । धेनूनां छदमंडलानि शिखिनां रोमाण्यवीनामपि ॥ पुच्छ-स्नायुवसाविषाणनखरस्वेदादिकं किंचन । स्याज्जन्मिन्युपकारि मर्त्यवपुषो नामुष्य किंचित्पुनः ॥ ३४ ॥ इत्याद्युपदेशं लोकेभ्यो यच्छन् स तत्र स्थितोऽस्ति. तत् श्रुत्वा कुपितो राजा जगाद् अरे! यो ममाज्ञा-मपि न मन्यते स चायं योगी मारणीय एव. राज्ञ इति वचनं श्रुत्वा मंत्री जगाद्, हे स्वामिन् तस्य विद्यासिद्धस्य योगींद्रस्योपरि भवतां क्रोधकरणं युक्तं न, असदृशनरेषु कोपकरणं युक्तं न, यतः—यद्यपि मृगपतिपुरतो । विरसं रसतीह मत्तगोमायुः ॥ तदपि न कुप्यति सिंहो । विसदृशपुरुषेषु कः कोपः ॥ ३५ ॥ हे स्वामिन् त्वं राजासि, एष च योगी वर्तते. राज्ञोक्तं तर्हि हे मंत्रिन् त्वं तत्र गत्वा तस्य योगिनः स्वरूपं विलोकय? ततो मंत्री स्तोकपरिवारयुतस्तत्र गतः, मंत्रिणमागच्छंतं विलोक्य स योगींद्रोऽपि बहुमानपूर्वकमभ्युत्थानादिना तस्य प्रतिपत्तिं चकार. तदा मंत्रिणोक्तं हे योगींद्र यूयं सर्वेषामपि पूज्याः स्थ, ततो मयि कृपां विधाय युष्मत्स्थाने उपविशत? योगिनोक्तं हे मंत्रीश यूयमपि राजमान्यत्वात्सत्काराहाः एव स्थ. उक्तं च—राजमान्यं धनाढ्यं च । विद्यावंतं तपस्विनं ॥ रणे शूरं च

दातारं । कनिष्टमपि ज्येष्टयेत् ॥ ३६ ॥ ततो मंत्री स्माह हे योगिराज! राज्ञा यूयमाकारिताः स्थ, राजा च सर्वदर्शनाधारो वर्तते, तेन कृपां विधाय यूयं राजसभायामागत्य कामपि कलां दर्शयत? तत् श्रुत्वा योगी प्राह हे मंत्रींद्र अस्मादृशां योगिनां राज्ञः किं प्रयोजनं? यतः—भुंजीमहि वयं भिक्षां । जीर्णं वासो वसीमहि ॥ शयीमयि महीपीठे । कुर्वीमहि किमीश्वरैः ॥ ३७ ॥ किंच भो मंत्रिन् राजा तु स एव कथ्यते यः कस्यापि न्यायमन्यायं वा वेत्ति तत्फलं च दर्शयति, तस्य पुण्यमपि च स्यात्, उक्तं च—प्रजानां धर्मषड्भागो । राज्ञो भवति रक्षितुः ॥ अधर्मस्यापि षड्भागो । जायते यो न रक्षति ॥ ३९ ॥ अपरं च—दुष्टस्य दंडः स्वजनस्य पूजा । न्यायेन कोशस्य च संप्रवृद्धिः ॥ अपक्षपातो विषयेषु रक्षा । पंचैव धर्माः कथिता नृपाणां ॥ ४० ॥ राजलक्षणानि दुर्लभानि, पापानि कुर्वंतं राजानं चेन्मंत्री न निषेधयति तदा मंत्रिणोऽपि दोषः स्यात्. नृपेण हि कृतं पापं । मंत्रिणोऽपि लगेध्ध्रुवं ॥ गुरोः शिष्यकृतं पापं । पत्नीपापं च भर्तरि ॥ ४१ ॥ तत् श्रुत्वा मंत्रिणा पृष्टं हे योगींद्र राज्ञा तत्किं पापं कृतमस्ति? योगिनोक्तं हे मंत्रिन् शृणु? ये योगिनः पृथक्पृथग्देशेषु भ्रमंतो भिक्षया निजाजीविकां कुर्वंति, कस्यापि च निंदां न कुर्वंति, एवंविधा अप्येते योगिनो राज्ञा चौरा इव कथमत्र रक्षिताः संति? एवंविधश्च

राज्ञोऽन्यायः कथं सोढुं शक्यते? अतस्त्वं राज्ञः पार्श्वे गत्वा तान् विमोचय? ततो मंत्री तत उत्थाय नृपपार्श्वे गत्वा तस्य योगिनः सर्वं स्वरूपं कथयामास. पुनरपि तेन राज्ञे कथितं हे स्वामिन् असौ योगी महाविद्वान् दानेश्वरी कलावांश्च दृश्यते, तस्य तु बहुमानदानमेव युक्तं, एते पूर्वं स्थापिताश्च योगिनोऽथ द्रुतं मोच्याः. इति श्रुत्वा राज्ञा मोचितास्ते सर्वेऽपि योगिनस्तस्याशीर्वादं दत्वा वने गताः, ततो राज्ञा योगींद्रमाकारयितुं स्वांगरक्षकास्तत्र प्रेषिताः, तानागच्छंतो दृष्ट्वा योगिनोक्तं, चेद्यूयं मत्समीपमागमिष्यथ तर्हि सर्वानपि भवतोऽहं भस्मसात्करिष्यामि. ततस्तैर्भीतैर्दूरस्थैरेव स योगींद्र आकारितः, तदा योगींद्रेणोक्तं यदि नृपस्य कार्यं भविष्यति तदा स स्वयमेव यानं लात्वात्रागमिष्यति. ततस्तैः पश्चाद्वलित्वा नृपाग्रे समागत्य योगिप्रोक्तो वृत्तांतः कथितः. तदा सपरिवारो राजापि यानयुतस्तत्र समागतः, मनः स्थिरं यस्य विनावलंबनं । दृष्टिः स्थिरा यस्य विनैव दर्शनं ॥ वपुः स्थिरं यस्य विना प्रयत्नं । स एव योगी स गुरुश्च सेव्यः ॥ ४२ ॥ इत्युक्त्वा स योगिने प्रणाममकरोत्, बहुविधं सन्मानं च दत्तवान्. यतः—विद्वत्वं च नृपत्वं च । नैव तुल्यं कदाचन ॥ स्वदेशे पूज्यते राजा । विद्वान् सर्वत्र पूज्यते ॥ ४३ ॥ पंडितेषु गुणाः सर्वे । मूर्खे दोषास्तु केवलं ॥ तस्मान्मूर्खसहस्त्रेण । प्राज्ञ एको न लभ्यते ॥ ४४ ॥

हे योगींद्र त्वं विद्वानसि, तेन च सर्वमान्योऽप्यसि. इत्यादीनि राज्ञो वचांसि श्रुत्वा योगी जगौ, हे राजन् त्वमपि पंचमलोकपालत्वान्मानार्होऽसि. यतः—वयोवृद्धास्तपोवृद्धा। ये च वृद्धा बहुश्रुताः ॥ सर्वे ते धनवृद्धानां । द्वारे तिष्टंति किंकराः ॥ ४४ ॥ ततो नृपेण स योगी बहुसन्मानपूर्वकं यानारूढः स्वावासे समानीतः. ततो राज्ञा प्रणम्य स पृष्टः, हे स्वामिन् भवतां पार्श्वे कापि कौतुककारिणी विद्या जटिका मूलिका वा वर्तते? योगिनोक्तं गुरुप्रसादादस्त्येव. नृपः प्रोवाच, तर्हि हे योगींद्र मत्पुत्री केनापि मर्कटीरूपा कृतास्ति तां त्वं सज्जीकुरु? योगिनोक्तं चेत्तां सज्जां यथास्थितरूपां च करोमि तर्हि त्वं मह्यं किं दास्यसि? राज्ञोक्तं दीनारपंचशतीं ग्राममेकं च ते दास्यामि. योगिनोक्तं वयं योगिनो धनेन ग्रामेण च किं कुर्महे? चेत्तया कुमार्या सह मम पाणिग्रहणं कारयिष्यसि तदैव तामहं सज्जां करिष्यामि. तत् श्रुत्वा राजा चिंतातुरो जातः, इतो दुस्तटी इतश्च व्याघ्र इति न्याये पतितश्च, उक्तं च—एकतो हि गमनं परदेशे—ऽप्यन्यतश्च पिशुनैः सह संगः ॥ पूर्वमेव हि कुभोजनमासी—न्मक्षिकानिपतनं च तथान्यत् ॥ ४६ ॥ एवं चैकतो मम सुता मर्कटीभूता दुःखिन्यस्ति, अन्यतश्चायं मंत्रादिविज्ञो योगी तदिच्छां करोतीति चिंतातुरेण राज्ञा मंत्रिणंप्रति पृष्टं, भो मंत्रिन्नथ किं कर्तव्यं? मंत्री प्राह हे स्वामिन्नेकवारं

त्वेवमपि मानयित्वा पुत्रीं सज्जां कुरुत? पश्चाद्यथोचितं विमृश्य बुद्धिबलेन करिष्यामः, ततो राज्ञापि तत् स्वीकृतं उक्तं च कुमार्याः सज्जीकरणानंतरं तया सार्धं तस्याः पाणिग्रहणं कारयिष्यामि. ततो राजा मंत्री योगी च त्रयोऽपि कुमार्या आवासंप्रति प्रस्थिताः, मार्गे योगिना ताभ्यां प्रोक्तं चेदिच्छा तर्हि युवां समागच्छतां, परं तत्र मया पठ्यमानं मंत्रं यः श्रवणगोचरीकरिष्यति स ग्रथिलीभूय मूको भविष्यति. तत् श्रुत्वा भीतो राजा तु पश्चाद्गतः, परं मंत्री तु तेन सहैव चलितः. अथ कुमार्यावासाग्रे समागतो मंत्री योगिना प्रोचे, अरे मंत्रिन् त्वं मूर्खोऽसि, यतस्तत्र मंत्रादि शृण्वन् चेत्त्वं ग्रथिलीभूय निश्चेष्टो भविष्यसि तदा तव का गतिः? मंत्री प्राह वज्रांगस्य मम शरीरे तु तत्र किमपि न भविष्यति. पुनर्मंत्रिणंप्रति योगिनोक्तं, अरे मुग्ध मुधा मर्तुं कथं वांछसि? मणिमंत्रौषधीनां ह्यचिंत्यो महिमास्ति, चेन्न मन्यसे तर्ह्येकां मया कथ्यमानां कथां त्वं शृणु? एकस्मिन् ग्रामे भ्रातृद्वयं वसतिस्म, तयोश्च पुत्रपौत्रादिकं बहुलं कुटुंबमासीत्. तत्र कुटुंबेऽन्यान्यकुलसमागतं वधूवृंदं मिथः सर्वदा भृशं कलहं करोतिस्म. तत्कलहं दृष्ट्वा तौ द्वावपि भ्रातरौ पृथग्जातौ. तयोर्वृद्धभ्रातुर्धनं पुण्ययोगेन वृद्धिं प्राप्तं, लघोस्तु पापोदयेन क्षयं गतं. तेन स लघुभ्राता प्रतिदिनं काष्ठाद्यर्थं वने याति, एवं काष्ठादि विक्रीय स सदा

स्वनिर्वाहं करोति. अथैकदा वनमध्ये यावत्स एकं वृक्षं छिनत्ति, तावत्तत्र वसन् यक्षः प्रकटीभूय तंप्रत्युवाच हे भद्र! त्वमेतन्मे निवासस्थानं मा छेदय? यथेष्टं च प्रार्थय? तेनोक्तं हे यक्षाधिराज तर्हि मत्कुटुंबाजीविकायोग्यं धान्यादि त्वं समर्पय? यक्षेणोक्तं तत्सर्वमहं तुभ्यं तव गृहे सर्वदार्पयिष्यामि. ततो हृष्टः स लघुभ्राता गृहे समागत्य यावद्विलोकयति तावत्स्वकुटुंबनिर्वाहयोग्यं भाजनस्थं धान्यादि दृष्ट्वा भृशं मुमोद. एवं च स प्रत्यहं यक्षेण दत्तं धान्यादि प्राप्य सुखेन स्वकुटुंबनिर्वाहं चकार. एवं तं सुखेन कुटुंबनिर्वाहं कुर्वंतं विलोक्य वृद्धभ्रातृस्त्रिया लघुभ्रातृमहिलांप्रति तत्कारणं पृष्टं, तयापि च देवतुष्ट्यादि तत्सकलं स्वरूपं निगदितं. ततस्तया वृद्धभ्रातृपत्न्या स सर्वोऽपि वृत्तांतो निजभर्त्रे कथितः, ततो भार्यया प्रेरितः सोऽपि स्कंधे कुठारमादाय तमेव वृक्षं छेत्तुं वने ययौ. तदनंतरं यावत्स तं वृक्षं छेत्तुं लग्नस्तावद्यक्षेण तस्य हस्तौ बद्धौ, तस्य शरीरादौ च महती व्यथा कृता. एवं च यक्षेण स्तंभितोऽसौ तत्र महाकरुणस्वरं पूत्कारं कर्तुं लग्नः, तत्र मिलितैर्लोकैस्तं तथाविधं दृष्ट्वा तद्भार्यायै तस्य स्वरूपं कथितं. तदा भयभीता सापि तत्रागत्य बलिकर्मादि कृत्वा यक्षंप्रति प्रोवाच, हे यक्षाधिराज कृपां विधाय मम पतिं मुंच? यक्ष आह भो भामिनि तव गृहे नित्यं यावन्मितं महिषीणां घृतं भवति तत्सर्वं त्वया तव देवगृहे

प्रेषणीयं, यदिदं त्वं स्वीकरोषि तदा तव स्वामिनमहं मुंचामि, यस्मिंश्च दिवसे त्वं तद्गृहे तत्सर्वं घृतं न दास्यसि, तदा तवेमं भर्तारं पुनरपि तथैव करिष्यामि. ततस्तयापि भीतया तत्सर्वं प्रतिपन्नं. ततो यक्षेण मुक्तो वृद्धभ्राता स्वगृहे गतः. तथा हे मंत्रिन् त्वमपि मया वार्यमाणश्चेन्न स्थास्यसि तदा स इव पश्चात्तापं प्रयास्यसि. योगिनेत्युक्तो मंत्र्यपि भीतः पश्चात् स्वगृहे गतः. अथ स योगी हृष्टः सन्नेकाक्येव कुमार्या आवासमध्ये गतः, ततस्तेन दासीसमूहं बहिष्कृत्य तस्या मर्कटिकाया अग्रे मूलिका धृता, तत्क्षणमेव सा मूलस्वरूपा जाता. ततस्तया कुमार्याहूताः सर्वा अपि दास्यस्तत्र समागताः, ता अपि कुमारीं स्वरूपस्थां विलोक्यातीवहृष्टाः सत्यः प्रोचुः, हे सखि मर्कटीभूता त्वमनेन सत्पुरुषेण नृपादेशात्सज्जीकृतासि, कुमार्याप्युक्तमहोऽस्य परोपकारित्वं! यतः—विरला परकज्जकरा। विरला पालंति लद्धनेहं च ॥ विरला परदुक्खदुहिआ। परदुक्खे दुक्खिया विरला ॥४८॥ ततो दास्यस्ताः सर्वा अपि राज्ञो वर्धापनिकां दातुं गताः. तदा तया कनकवत्या राजकुमार्या योगिवेषधारिणं कुमारंप्रत्युक्तं हे स्वामिन्नथ मांप्रति सौम्यदृष्ट्या विलाकय? इत्यादिवचनैर्बहुविज्ञप्तोऽपि कुमारस्तस्याः सन्मुखमपि न पश्यतिस्म. अथ दासीभिर्वर्धापितो राजा हर्षविषादाभ्यां सममेवालिंगितः कुमार्यावासे समागतः. तदा योगींद्रेणोक्तं हे

राजन्मया तव पुत्री सज्जीकृतास्ति. तत् श्रुत्वा भृशं चिंतातुरो राजा स्वमनसि चिंतयामास, अहो एष योगी त्वज्ञातकुलः कोऽपि वैदेशिको वर्तते, तेन तस्येयं कन्या कथं दीयते? ततो राज्ञा प्रेरितो मंत्री तं योगिनंप्रत्याह हे योगिराज भवतां कुत्र वासः? का जातिः? किं कुलं? को धर्मः? अस्मिन् वयसि च योगग्रहणे किं कारणं? योगी प्राह हे मंत्रींद्र! जातिकुलादिप्रश्नैस्तव किं प्रयोजनं? राज्ञा पूर्वं यत्कन्यादानं प्रतिश्रुतमस्ति तदेवाहमप्यर्थयामि, यतः सतां वचनमन्यथा नैव भवति. तत् श्रुत्वा मंत्रिणा प्रोक्तं हे योगींद्र यूयं तूत्तमाः परोपकारिणो गुणज्ञा गुणवंतश्च स्थ, यतः—न ब्रूते परदूषणं परगुणं वक्त्यल्पमप्यन्वहं। संतोषं वहते पर्द्धिषु पराबाधासु धत्ते शुचं॥ स्वश्लाघां न करोति नोज्झति नयं नौचित्यमुल्लंघय–त्युक्तोऽप्यप्रियमक्षमां न रचयत्येतच्चरित्रं सतां॥ ५८॥ तेन हे योगींद्र भवद्गुणैरेवास्माभिर्भवतो जात्यादि सर्वमपि शुभं ज्ञातं. यतः–आकारैरिंगितैर्गत्या। चेष्टया भाषणेन च॥ नेत्रवक्त्रविकारैश्च। लक्ष्यतेंतर्गतं मनः॥५९॥ तथापि हे योगींद्र कृपां विधाय राज्ञो मनःशांत्यर्थं यूयं सत्यं स्वजातिकुलादि कथयत? तत् श्रुत्वा स योगींद्रवेषधारी राजकुमारः प्राह हे मंत्रींद्र तव मधुरवचनैः संतुष्टोऽहं मम सत्यं वृत्तांतं तवाग्रे कथयिष्यामि, यतः—न तथा शशी न सलिलं। न चंदनं नापि शीतलच्छाया॥ आह्ला-

दयंति पुरुषं । यथा हि मधुराक्षरा वाणी ॥ ६० ॥ ततः कुमारेण मंत्रिणोऽग्रे यथास्थितः स्ववृत्तांतः प्रोक्तो यथा—मन्मथनृपपुत्रो रूपसेनाभिधोऽहं कुमारोऽस्मि. तत् श्रुत्वा राजामंत्रिप्रभृतिसर्वोऽपि परिवारः परमानंदं प्राप्तवान्. तत्कालं राज्ञा दैवज्ञा आकारिताः, शुभं लग्नं च गृहीत्वा तेन सह सा कनकवती पुत्री राज्ञा समहोत्सवं परिणायिता, हस्तमोचनावसरे च राज्ञा करितुरगवस्त्रद्रव्यादि कुमाराय दत्तं. ततो रूपसेनकुमारः कियद्दिनानि तत्र स्थित्वा सपरिवारः कनकवत्या युतः स्वनगरंप्रति प्रस्थितः, कियद्भिर्दिनैः शुभशकुनैः प्रेरितः स राजग्रहनगरे प्राप्तः, स्वमातापित्रोश्च मिलितः, तावपि पुत्रं कुशलेन समागतं दृष्ट्वातीवहृष्टौ, पौराश्च राज्ञो वर्धापनिकां यच्छंतिस्म, एवं राजगृहे नगरे महामहोत्सवः संजातः, राज्ञा च दीनयाचकेभ्यो बहूनि दानानि दत्तानि. एवं पद्मावतीसहायतो जैनाचार्यकथनानुसारेण स रूपसेनकुमारः स्वकलत्रयुतः समृध्ध्या सह द्वादशवर्षैस्तत्रागतः. यतः—अमोघा वासरे विद्यु-दमोघं निशि गर्जितं ॥ अमोघा देवतावाणी । अमोघं मुनिभाषितं ॥ ६१ ॥ इतो वनमध्ये श्रीजैनाचार्याः समवसृताः, तदा मन्मथराजातीवहृष्टः सन् परिवारयुतस्तेषां वंदनार्थं वनमध्ये गतः. गुरुभिरप्युपदेशो दत्तः, यथा—दुर्लभं मानुषं जन्म । दुर्लभं श्रावकं कुलं ॥ दुर्लभा धर्मसामग्री । दुर्लभा धर्मवासना ॥ ६२ ॥ किं

च हे राजन् संसारसमुद्रतारिणी श्रीशत्रुंजयतीर्थयात्रापि दुर्लभास्ति. यतः—एकैकस्मिन् पदे दत्ते।
शत्रुंजयगिरिंप्रति॥ भवकोटीसहस्राणां। पातकानि प्रयांति हि॥६५॥ श्रीतीर्थपांथरजसा विरजीभवंति।
तीर्थेषु बंभ्रमणतो न भवे भ्रमंति॥ तीर्थव्ययादिह नराः स्थिरसंपदः स्यु–स्तीर्थार्चनादिह पुनर्जगदर्च-
नीयाः॥६६॥ सदा शुभध्यानमसारलक्ष्म्याः। फलं चतुर्धा सुकृताप्तिरुच्चैः॥ तीर्थोन्नतिस्तीर्थकृतां
पदाप्ति–गुणा हि यात्राकरणे स्युरेते॥६७॥ इत्यादि गुरूपदेशं श्रुत्वा सत्वाधिको राजा हृष्टः सन्
कथयामास, हे भगवन्नतः परं शत्रुंजयतीर्थयात्रां कृत्वैवाहं दुग्धदध्यादि भोक्ष्ये, इत्यभिग्रहं गृहीत्वा स
गुरून् वंदित्वा गृहे गतः. ततः स मन्मथराजा परिवारेण सह महर्ध्या युतस्तीर्थयात्रायै चलितः, स्थाने
स्थाने च जिनपूजादिमहोत्सवं कुर्वन् क्रमेण स शत्रुंजयगिरौ प्राप्तः. तत्र परिवारयुतो महताडंबरेण तं
तीर्थाधिराजं त्रिःप्रदक्षिणीकृत्य श्रीयुगादिजिनमंदिरे स्नात्रादिपूर्वकमष्टाह्निकामहोत्सवं कृतवान्. ततस्तेन
तत्र भोजनवस्त्रादिदानपुरस्सरं श्रीचतुर्विधसंघस्य भक्तिर्महताडंबरेण कृता. इतस्तत्र श्रीमन्मथराज्ञो
हृदयेऽकस्मात् शूलमुत्पन्नं, तेन स शुभभावनां भावयन् तीर्थध्यानं च कुर्वन् तत्रैव सिद्धक्षेत्रे कालं कृत्वा
सौधर्मदेवलोके स समुत्पन्नः. ततो रूपसेनकुमारादिपरिवारस्तस्योत्तरक्रियां विधाय ततः पश्चाद्वलित्वा

संघयुतः स्वनगरे प्राप्तः. तत्र च शुभे मुहूर्त्ते प्रधानादिभिः स रूपसेनकुमारो राज्येऽभिषिक्तः, अनेके च भूपालास्तस्य तुरंगमादीनां प्राभृतं चक्रुः. एवं स रूपसेनराजाथ न्यायेन स्वप्रजाः पालयतिस्म. अथैकदा तत्र लीलावने भ्रमंतो जैनगुरवः समवसृताः, तदा हृष्टो राजा सपरिवारस्तान् वंदितुं तत्र ययौ. गुरुभिश्च देशना दत्ता, यथा—भवकोटीदुःप्रापा—मवाप्य नृपत्वादिसकलसामग्रीं ॥ भवजलधियानपात्रे । धर्मे यत्नः सदा कार्यः ॥ ६८ ॥ देशनांते राज्ञा श्रीगुरवः पृष्टाः, हे भगवन् केन कर्मणा मम द्वादशवर्षाणि यावन्मातापित्रोर्वियोगो जातः? केन कर्मणा चापूर्वाणि चत्वारि दिव्यवस्तूनि मया प्राप्तानि? केन कर्मणा च परदेशेऽपि मम धनमहत्वादिप्राप्तिरभूत्? केन कर्मणा चैवं दुःखसुखे मया प्राप्ते? तत्सर्वं मयि कृपां विधाय यूयं कथयत? तदा तैर्ज्ञानिभिर्गुरुभिः प्रोक्तं हे राजन् त्वं तव पूर्वभवं शृणु? तिलकपुरे सुंदराभिधः कौटुंबिकस्त्वमासीः, तव मारुताभिधाना च भार्या बभूव, तौ पुत्रपौत्रादियुतौ कृषिकर्म कुरुतःस्म. एकदा तव क्षेत्रसीमायां सहकारवृक्षतले कश्चित्सिद्धनरः समागत्य स्थितः, त्वया च स मासं यावत् सेवितः, तदा संतुष्टेन तेन तव रूपपरावर्तिनी विद्या समर्पिता. तद्विद्याबलेन च त्वं सर्वाणि कार्याणि कृतवान्. दीनादीनां च त्वया भूरि दानं दत्तं. अन्यदा तव क्षेत्रसमीपवने जैनमुनयः प्राप्ताः,

तदा त्वमपि सपरिवारो भद्रकपरिणामस्तेषां समीपे धर्मं श्रोतुं समुपविष्टः. गुरुभिरपि तुभ्यं दयादानादिरूपो धर्मोपदेशो दत्तः, कथितं च हे भद्र क्षेत्राद्यारंभकरणाद् बहु पापं भवति, त्वयोक्तं हे स्वामिन् मम बहुकुटुंबपशुगोकुलादिपरिवारोऽस्ति, तेन च क्षेत्रं विना मम निर्वाहः कथं स्यात्? गुरुभिरुक्तं तथापि हे भद्र त्वं कमपि नियमं गृहाण? येन तव बहु फलं स्यात्, यतः स्तोकोऽपि नियमो येन पाल्यते स परभवे बहुसमृद्धियुतो भवति. तत् श्रुत्वा त्वया प्रोक्तं, हे स्वामिन् तर्हि अतःपरमहं सर्वदा जिनदर्शनं विधाय जिनमंदिरे स्वस्तिकं करिष्यामि, यथाशक्ति सुपात्रे दानं दास्यामि, महज्जीवानां घातं न करिष्यामि, रात्रौ च भोजनं न विधास्ये. तदा गुरुभिरपि तुभ्यं ते नियमा दत्ताः, कथितं च हे भद्र! एतेषां नियमानां पालनेन तवात्र परत्र च सुखं भविष्यति. यतः—अक्षतान् ढौकयेद्योऽत्र। देवाग्रे भक्तिपूर्वकं ॥ अखंडसुखमाप्नोति। स्त्रीपुत्रधनसंयुतं ॥७१॥ सैव भूमिस्तदेवांभः। पश्य पात्रविशेषतः॥ आम्रे मधुरतायाति। कटुत्वं निंबपादपे ॥ ७२ ॥ यावंति रोमकूपाणि। पशुगात्रेषु भारत ॥ तावद्वर्षसहस्राणि। पच्यंते पशुघातकाः ॥७३॥ चत्वारो नरकद्वाराः। प्रथमं रात्रिभोजनं ॥ परस्त्रीगमनं चैव। संधानानंतकायिके ॥ ७४ ॥ इति श्रुत्वा पापभीरुणा त्वयापि ते चत्वारो नियमाः सम्यक् पालिताः.

 



एकदा च मार्गे गच्छतः साधोस्त्वया भावपूर्वकं घृतगुडमिश्राः पूपकाः प्रतिलाभिताः, तथैव तस्य सुपात्रदानस्य त्वयानुमोदनापि कृता. उक्तंच—आनंदाश्रूणि रोमांचो । बहुमानं प्रियं वचः ॥ किंचानुमोदना पात्रे । दानभूषणपंचकं ॥ ७५ ॥ दाने चैतानि दूषणानि—अनादरो विलंबश्च । वैमुख्यं विप्रियं वचः ॥ पश्चात्तापश्च पंचामी । सद्दानं दूषयंति हि ॥ ७६ ॥ एकदा तव श्वशुरस्त्वत्पत्न्या आनयनार्थं तव गृहे समागतः, तदा त्वयोक्तमहं तां नैव प्रेषयिष्यामि. तव पत्न्या चोक्तमहं बहुदिनान्यत्र स्थितास्मि. तेन स्तोकं कालमथ पितुर्गृहेऽपि यास्यामीति तया कदाग्रहो मंडितः, वार्यमाणापि सा तस्मात् कदाग्रहान्न तिष्टति. तदा त्वया रुष्टेन रूपपरावर्तिन्या विद्यया तत्पिता वत्सरूपः कृतः, द्वादशघटीर्यावच्च कीलके बद्धः, त्वं च स्वयं क्षेत्रे गतः, ततो गृहागतस्य तव पत्न्या पृष्टं, हे स्वामिन् मम पिता क्व गतः? त्वयोक्तं स तु निजगृहे गतः, तत् श्रुत्वा खिन्नया तया त्वां प्रत्युक्तं, हे स्वामिन् मां मम पितुर्गृहे प्रेषय? अन्यथाहं भोजनं न करिष्ये. एवं तया मुहुर्मुहुः कथिते सति त्वया विद्याबलेन स तत्पिता यथास्थितस्वरूपः कृतः, स्वपत्नी च तेन सह प्रेषिता, त्वया दीनादीनां दानं दत्तं, साधुप्रशंसा कृता, परोपकारसत्रागारादिपुण्यानि च कृतानि. ततः कालं कृत्वा त्वं मन्मथनृपगृहे पुत्रोऽभूः, त्वत्पत्न्यपि पुण्यादि

॥ ७६ ॥

विधाय कनकप्रभनृपगृहे इयं कनकवती पुत्री जाता, प्राग्भवस्नेहाच्च युवयोः परस्परं प्रीतिर्बभूव, तस्या द्वादशघटिकावधि पितुर्वियोगकरणेन तवापि द्वादशवर्षावधि पितुर्वियोगोऽभूत्. चतुर्नियमपालनात्तवा-पूर्ववस्तुचतुष्टयप्राप्तिश्चाभूत्, साधूनां पूपकादिदानात्तव स्त्रीधनमहत्वादिप्राप्तिर्जाता. इति श्रुत्वा स रूपसेनराजा गुरुपार्श्वे श्राद्धधर्मं स्वीकृत्य तानेव चतुर्नियमान् गृहीत्वा गृहे गतो धर्मपरश्च राज्यं पालयतिस्म. अथैकदा तस्य विषमज्वरव्याधिरुत्पन्ना, बहुवैद्यैरुचारः कृतः, परं तस्य गुणो न जातः, इत एको वैदेशिको महावैद्यस्त्रिकालवित्तस्याग्रे समायातः, तेन राजानं विलोक्य कथितं हे राजन् तवायं देवकृतो व्याधिरुत्पन्नोऽस्ति, ततस्तस्मै देवाय बलिदान दत्वा तन्मांसशेषां त्वं भक्षय? येन तव ज्वरो यास्यति, अन्यथा नैव यास्यति. तत् श्रुत्वा राज्ञा प्रोक्तं हे वैद्य अहं प्राणांतेऽपि मम नियमभंगं नैव करिष्यामि. इति तन्निश्चयं ज्ञात्वा स देवः प्रत्यक्षीभूय प्रोवाच, हे राजन् नियमपालने तवेंद्रेण देवसभायां प्रशंसा कृतासीत्, मया च तद्विषया तवेयं परीक्षा कृता, परं त्वं नियमादचलनाद्धन्योऽसि. परमथ पक्षांते तव नागान्मरणमस्तीत्युक्त्वा स देवः स्वस्थाने गतः. अथोक्तदिने गजारूढो गच्छन् स तेन पातितो मृत्वा सध्यानाद्देवो जातः. एवं सर्वैरपि भव्यै रूपसेनवत् स्वनियमाः पालनीयाः, येनात्र परत्र च सुखमेव

स्यात्. यतः—ये पालयंति नियमान् । परिपूर्णान् रूपसेननृपतिरिव ॥ ते सुखलक्ष्मीभाजः । पदे पदे स्युर्जनश्लाघ्याः ॥ ७७ ॥ विशालराजसूरीश–सुधाभूषणसद्गुरोः ॥ शिष्येण जिनसूरेण । सुकृताय कृता कथा ॥ ७८ ॥ इति नियमपालने मन्मथनृपपुत्रश्रीरूपसेननृपतिचरित्रं समाप्तम् ॥

॥ श्रीरस्तु ॥

॥ इति रूपसेनचरित्रं समाप्तम् ॥